# मूल्यशिक्षा

## Course Code: B21SN02SE

Skill Enhancement Course
Undergraduate Programme in
Sanskrit Language and Literature
Self Learning Material



SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# मूल्यशिक्षा

Course Code: B21SN02SE

Semester - V

## Skill Enhancement Course
## Undergraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# मूल्यशिक्षा

Course Code: B21SN02SE
Semester- V
Skill Enhancement Course
BA Sanskrit Language and Literature

SREENARAYANAGURU
OPEN UNIVERSITY

**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K.V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.

**Development of the Content**

Anju J.

**Review**

Dr. G. Sahadevan

**Edit**

Dr. G. Sahadevan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Anju J.
Dr. Jothilekshmi M.
Dr. Sreeja J.
Dr. Vijayarajan K.U.
Chitra Bhaskar

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

**Director, MDDC :**
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.

Scan this QR Code for reading the SLM on a digital device.

**Edition:**
January 2025

**Copyright:**
© Sreenarayanaguru Open University

ISBN 978-81-982754-6-2

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.m

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V. P.

01-01-2025

# CONTENTS

**Block - 1 भगवद्गीता (३० श्लोकाः) नीतिशतकं च (१५ श्लोकाः)** 1

Unit -1 प्रस्थानत्रये भगवद्गीता 2

Unit - 2 भगवद्गीता - द्वितीयेऽध्याये १ - १५ श्लोकाः 18

Unit - 3 भगवद्गीता द्वितीयेऽध्याये १६ - ३० श्लोकाः 31

Unit - 4 भर्तृहरेः नीतिशतकादुद्धृताः १५ श्लोकाः 43

**Block-2 मनुस्मृतिः (१५ श्लोकाः), याज्ञवल्क्यस्मृतिश्च (१० श्लोकाः)** 58

Unit - 1 मनुस्मृतेः अधोनिर्दिष्टाः ८ श्लोकाः 59

Unit - 2 मनुस्मृतेः अधोनिर्दिष्टाः ७ श्लोकाः 66

Unit - 3 याज्ञवल्क्यस्मृतेः अधोनिर्दिष्टाः १० श्लोकाः 73

**Set-1 Model question paper** 81

**Set-2 Model question paper** 84

SGOU

BLOCK-1

# भगवद्गीता (३० श्लोकाः)
# नीतिशतकं च
# (१५ श्लोकाः)

SGOU

# Unit -1
## प्रस्थानत्रये भगवद्गीता

### उद्देश्यानि (Learning Outcomes)

- स्मृतिप्रस्थानस्य परिचयं लभेत ।
- गीतानुसारेण कीदृशं कर्म कर्तव्यम् इति विवेकः स्यात् ।
- गीतानुसारेण श्रद्धाभेदान् ज्ञास्यति ।
- त्रयाणाम् अपि गुणानां कार्यम् अवगच्छेत् ।
- मोक्षप्राप्तये उपायान् जानीयात् ।
- ब्रह्मणः स्वरूपनिर्णयं कर्तुं प्रभवेत् ।

### प्राग्व्यपेक्षाः (Prerequisites)

प्रतिष्ठन्ते वेदान्ताः येषु इति वा, यैः इति वा श्रुतिस्मृतिन्यायरूपाणि शास्त्राणि वेदान्तसम्प्रदाये प्रस्थानान्युच्यन्त । एवञ्च ब्रह्मबोधकानां शब्दप्रमाणानां वेदान्तानां प्रतिष्ठा यत्र भवति, येन च भवति तदेव प्रस्थानम् । ध्वन्यालोकग्रन्थे लोचनकारेण अभिनवगुप्तपादेन प्रस्थानशब्दस्य निर्वचनं प्रदर्शितं यथा "प्रतिष्ठन्ते परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम् ।"

ननु वेदान्ताः इति उपनिषच्छ्रुतय एवोच्यन्ते तत्कथं वेदान्तानां श्रुतिप्रतिष्ठा स्यात्, स्वस्य स्वस्मिन् प्रतिष्ठाभावात् इति चेदुच्यते- आत्मस्वरूपस्य ब्रह्मणो बोधकानि शब्दप्रमाणानि तत्त्वमसीत्यादीनि वाक्यानि वेदान्तशब्दवाच्यानि भवन् । तानि हि स्वयं परमप्रमाणभूतान्यपि न खलु मन्दमतीनां दृष्टौ प्रतिष्ठावन्ति सन् । उपनिषच्छ्रुतिषु ब्रह्मबोधकानि वाक्यानि आख्यायिकायुक्तिदृष्टान्तार्थवादिभिः भिन्नभिन्नप्रबोधनप्रक्रियाभिश्च लब्धप्रतिष्ठानि । तस्मात् वेदान्ताः उपनिषत्सु प्रतिष्ठां लभन्ते इत्येतद्युज्यत ।

उपनिषत्सारसङ्ग्ररूपासु गीतासु, उपनिषद्वाक्यानामेव युक्तियुक्तं विचाराय विरचितेषु ब्रह्मसूत्रेषु च वेदान्तानां प्रतिष्ठा सुविदितैव ।अथवा भाष्यतद्व्याख्यानवादग्रन्थप्रकरणग्रन्थादिरूपस्य वेदान्तशास्त्रस्य प्रतिष्ठा यत्र तत्प्रस्थानम् । श्रुतिस्मृतिन्यायेषु हि भाष्यादिवेदान्तशास्त्रं प्रतिष्ठितम ।

उपनिषद्गीताब्रह्मसूत्ररूपप्रस्थानत्रयस्य समुपबृंहणरूपं हि अद्वैतवेदान्तशास्त्रम्। प्रस्थानत्रयं हि आत्मस्वरूपनिर्धारणे परमप्रमाणतां भजते। तदत्र स्मृतिप्रस्थानं अधिकृत्य विचार्यते।

## मुख्यपदानि (Keywords)

ब्रह्मविद्या, प्रवृत्तिलक्षणः, निवृत्तिलक्षणः, निःश्रेयसः,जन्मरहितः, अपक्षयरहितः, स्थितप्रज्ञः,ब्राह्मी स्थितिः।

## Discussion

स्मृतिप्रस्थानं गीताप्रस्थानम् इति कथ्यते। गीतोपदेशः भगवता गीता भगवद्गीता। एतस्य गीतोपदेशः इत्यपि नामान्तरं वर्तते। श्रीकृष्णः अत्र उपदेशकः श्रोता अर्जुनः। वैदिकसनातनवर्णाश्रमधर्मावलम्बिनां हैन्दवानां धर्मग्रन्थत्वेन विद्यते एषा भगवद्गीता। गीतायाम् अष्टादश अध्यायाः सन्ति। अस्याः मोक्षशास्त्रम्, ब्रह्मविद्या गीतोपनिषत्, इत्यादीनि नामानि अपि सन्ति। प्रत्येकस्यापि अध्यायस्य पृथक् नाम वर्तते। कृष्णार्जुनयोः संवादानुसारम् अध्यायाः विभक्ताः। श्रीमद्भगवद्गीताख्यं शास्त्रं वैदिकवाङ्मये सम्पूर्णवेदस्थानीयमिति शास्त्रविदां मतम्। महाभारतस्य शान्तिपर्वणि अन्तर्भूता श्रीमद्भगवद्गीता परमपुरषेण वासुदेवेन द्वापरे कुरुक्षेत्रे अर्जुनाय समुपदिष्टा कृष्णद्वैपायनव्यासेन सप्तशतश्लोकैः उपनिबद्धा। श्रुतौ प्रतिपादितः अर्थः एव स्मृतिप्रस्थाने आलोच्यते।

आध्यात्मिकभावनाप्रधाना गीता अद्वैतवेदान्तसाहित्यस्य द्वितीयं प्रस्थानम्। भगवता व्यासेन रचिता इयं श्रीमद्भगवद्गीता। अस्यां सप्तशतं (७००) श्लोकाः सन्ति। भगवता श्रीकृष्णेन ५३७ श्लोकाः निगदिताः, अर्जुनेन १२२ श्लोकाः, सञ्जयेन ४० श्लोकाः, धृतराष्ट्रेण च १ श्लोकः कथितः। गीताशास्त्रे वक्ता भगवान् श्रीकृष्णः स्वयमेव, श्रोता तु अर्जुनः। भाष्यस्योपोद्घाते तदिदं गीतशास्त्रं समस्तवेदार्थ सारसंग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेके विवृतपदार्थवाक्यार्थ- न्यायमत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्य-माणमुपलभ्याहं विवेकतोऽर्थ निर्धारणार्थं संक्षेपतो विवरणं करिष्यामि।

निःश्रेयसाख्यपरमपुरुषार्थमुद्दिश्य गीताशास्त्रं धर्मद्वयमुपदिशति- साक्षादुपायभूतं निवृत्तिलक्षणधर्मं, परम्परोपायभूतं बुद्धियोगेन युक्तं प्रवृत्तिलक्षणश्च धर्मम्। अभ्युदयर्थोऽप्रवृत्तिधर्मः

कर्तृत्वबुद्धिफलाभिसन्धिवर्जनरूपयोगकौशलेनानुष्ठीयमानः सत्त्वशुद्धिसम्पादनद्वारा आत्मानात्मविवेकज्ञाने समाधी पर्यवस्यति। एवं कर्मनिष्ठया ज्ञानं ज्ञाननिष्ठायोग्यताञ्च प्राप्तं कर्मसंन्यासपूर्वक-ज्ञाननिष्ठासम्पादनरूपेण निवृत्तिलक्षणधर्मेण निःश्रेयसमवाप्नोति।

अत्रैव कृत्स्नवेदान्तसारः निगदितः। शङ्कराचार्यैः उक्तम्- "तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थाम्"। निःश्रेयसमेव अत्र मुख्यं प्रयोजनम्। उक्तं च शङ्कराचार्यैः - "गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम्"।

## गीतायाः माहात्म्यम्

"गीताशास्त्रमिदं पुण्यं यः पठेत् प्रयतः पुमान।

विष्णोः पदमवाप्नोति भयशोकादिवर्जितः॥" इति

यः पवित्रम् इदं गीताशास्त्रं पठति, तस्य भयशोकादयः गच्छन्ति। एवञ्च विष्णुधामपदं सः प्राप्नोति।

"गीताध्ययनशीलस्य प्राणायामपरस्य।

नैव सन्ति हि पापानि पूर्वजन्मकृतानि च।।" इति

यः सर्वदा गीतायाः अध्ययनं प्राणायामञ्च करोति तस्य अस्मिन् जन्मनि कृतं पापकर्म अपि च पूर्वस्मिन् जन्मनि कृतं पापकर्म नष्टं भवति।

श्रीमद्भगवद्गीतायाम् अष्टादशाध्यायाः सन्ति। ते च अध्यायाः भवन्ति-

| **अध्यायः** | **अध्यायनाम** |
|---|---|
| प्रथमः | अर्जुनविषादयोगः |
| द्वितीयः | साङ्ख्ययोगः |
| तृतीयः | कर्मयोगः |
| चतुर्थः | ज्ञानकर्मसंन्यासयोगः |
| पञ्चमः | कर्मसंन्यासयोगः |

| | |
|---|---|
| षष्ठः | आत्मसंयमयोगः |
| सप्तमः | ज्ञानविज्ञानयोगः |
| अष्टमः | अक्षरब्रह्मयोगः |
| नवमः | राजविद्याराजगुह्ययोगः |
| दशमः | विभूतियोगः |
| एकादशः | विश्वरूपदर्शनयोगः |
| द्वादशः | भक्तियोगः |
| त्रयोदशः | क्षेत्रक्षेत्रज्ञयोगः |
| चतुर्दशः | गुणत्रयविभागयोगः |
| पञ्चदशः | पुरुषोत्तमयोगः |
| षोडशः | दैवासुरसम्पद्विभागयोगः |
| सप्तदशः | श्रद्धात्रयविभागयोगः |
| अष्टादशः | मोक्षसंन्यासयोगः |

## गीतायां प्रसिद्धानि भगवतः वचनानि

"नासतो विद्यते भावो नाभावो विद्यते सतः।

उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।" (श्रीमद् भगवद्गीता. २/ १६) इति

असत्पदार्थः कदापि न भवति, यथा- शशशृङ्गादिः। सत्पदार्थः सर्वदा भवति, यथा आत्मा। अनयोः उभयोः अपि सदसत्पदार्थयोः स्वरूपनिर्णयः केवलं तत्त्वज्ञानिनाम् एव भवति, न अन्येषाम्।

## आत्मनः स्वरूपम्

"न जायते म्रियते वा कदाचिन्नायं भूत्वाऽभविता वा न भूयः।

अजो नित्यः शाश्वतोऽ यं पुराणो न हन्यते हन्यमाने वा शरीरे। (गीता २/२०) इति

अयम् आत्मा कदापि न जायते न म्रियते वा, उत्पद्य पुनरपि उत्पद्यते इत्यपि वक्तुं न शक्यते, यतः अयम् आत्मा जन्मरहितः, सनातनः, पुरातनश्च। शरीरे नष्टेऽपि सः न पश्यति।

"वेदाविनाशिनं नित्यं य एनमजमव्ययम्।

कथं स पुरुषः पार्थ के घातयति हन्ति कम्॥ (गीता २/२१) इति

अयम् आत्मा विनाशरहितः, नित्यः, जन्मरहितः, अपक्षयरहितश्च इति यः जानाति सः ज्ञानी एव तादृशज्ञानवान् पुरुषः अन्यं कथं वा हन्ति। कथं वा हनने अन्यं प्रेरयति।

"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।

तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।" (गीता २/२२) इति

मनुष्यः वस्त्राणि धरति। परन्तु सः सर्वदा समानमेव वस्त्रं न धरति। धूतानि वस्त्राणि यदा जीर्णानि भवन्ति तदा तानि विहाय नूतनानि अन्यानि वस्त्राणि धरति। एवम् आत्मा अपि जीर्णानि शरीराणि परित्यज्य अभिनवानि अन्यानि शरीराणि आश्रयते।

"नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।" (गीता २/२३) इति

एनम् आत्मानं छेत्तुं न प्रभवन्ति। अग्निः एनं दग्धुं न प्रभवति। जलम् एनं नैव आर्द्रीकर्तुं शक्नोति। वायुः अपि एनं शोषयितुं न प्रभवति।

"अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।

नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।" (गीता २/२४) इति

अयम् आत्मा शस्त्रेण केनापि छेत्तुम् अशक्यः। अग्निना भस्मीकर्तुम् अपि न शक्यः। अस्य जलादिना क्लेदनम् आतपादिना शोषणं वा न शक्यम्। अयं सर्वदा भवति। सर्वत्रापि भवति। अयं निश्चलः स्थिरः सनातनश्च वर्तते।

## योगस्य लक्षणम्-

"योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।

सिध्यसिद्धयोः समो भूत्वा समत्वं योग उच्यते ।" (गीता २/ ४८) इति

हे अर्जुन ! अत्यासक्तिं परित्यज्य लाभालाभयोः विषये समभावनया चिन्तयन् एकाग्रमनस्कः भूत्वा कर्माणि आचर । लाभालाभयोः विषये समानतया व्यवहारः योगः इति उच्यते ।

"बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।

तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ।" (गीता २/५०) इति

हे पार्थ ! ज्ञानमार्ग समाश्रितः जनः सुकृतं दुष्कृतं चेति द्वयमपि परित्यजति । त्वमपि तद् परित्यज । फलम् अनपेक्षमाणः कर्मसु सज्जो भव । कर्मसु कौशलमेव योगः इति उच्यते ।

## स्थितप्रज्ञस्य लक्षणम्-

"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।

वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।" (गीता २/५६) इति

स्थितप्रज्ञस्य मनः दुःखेषु अनुद्विग्नं भवति । सः सुखेषु स्पृहवान् न भवति । रागात् भयात् क्रोधात् च सः अतीतः भवति ।

"यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।

इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।" (गीता २/५८)इति

इन्द्रियाणि सर्वदापिं शब्दादिषु विषयेषु प्रवृत्तानि भवन्ति । कूर्मः यथा भयात् स्वानि अङ्गानि संकोचयति तथा यदा अयं ज्ञाननिष्ठायां प्रवृत्तः जनः सर्वाणि इन्द्रियाणि शब्दादिभ्यः संकोचयति तदा तस्य प्रज्ञा प्रतिष्ठिता भवति । स च स्थितप्रज्ञो भवति ।

"एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।

स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ।" (गीता २/७२) इति

हे पार्थ ! इयं ब्राह्मी स्थितिः इति उच्यते। एनां स्थितिं यः प्राप्नोति सः कदापि मोहवशः न भवति। अन्तकाले अपि अस्यां स्थितौ स्थित्वा सः ब्रह्मानन्दं प्राप्नोति।

"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।

ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्॥" (गीता ३/३) इति

हे अर्जुन साङ्ख्यानां कृते ज्ञानमार्गः योगिनां कृते कर्ममार्गश्च इति द्विविधो मार्गः मया प्रागेव प्रोक्तः।

"न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।

न च संन्यसनादेव सिद्धिं समधिगच्छति॥" (गीता ३/४) इति

"न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत।

कार्यते ह्यवशः कर्म सर्व प्रकृतिजैर्गुणैः॥" (गीता ३/५) इति

यः कोऽपि कदापि क्षणकालमपि कर्मरहितः सन् न भवति यतः सर्वेऽपि प्रकृतिसम्भूतैः विकारैः विवशाः सन्तः कर्मप्रकरणे प्रवर्तन्ते।

**सृष्टिक्रमः**

"अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।

यज्ञाद्भवति पर्जन्यः यज्ञः कर्मसमुद्भवः॥" (गीता ३/१४) इति

प्राणिनः आहारात् उत्पद्यन्ते। आहारः वृष्टेः भवति। वृष्टिश्च यज्ञात् भवति। यज्ञस्तु कर्मणः समुद्भवति।

"कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।

तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥" (गीता ३/१५) इति

कर्म वेदात् उत्पन्नम्। वेदश्च परमात्मनः उत्पन्नोऽस्ति। अतः सर्वव्यापी भगवान् यज्ञे सदा तिष्ठति।

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।

अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥" (गीता ३/२७) इति

देहेन्द्रियादयः सर्वेऽपि प्रकृतेः विकारभूताः। ते एव कर्माणि कुर्वन्ति न तु आत्मा। अयं पुनः आत्मा यदा प्रकृतिजन्येन अहङ्कारेण युक्तः भवति तदा अहमेव सर्वेषां कर्मणां कर्ता इति जानाति।

**अवतारक्रमः**

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥" (गीता ४/७) इति

हे अर्जुन ! यदा यदा हि धर्मस्य हानिः अर्धमस्य आधिक्यं च लोके जायते तदा निराकारोऽपि साकारः अहम् अवतरामि।

"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥" (गीता ४/८) इति

सत्पुरुषाणां संरक्षणाय, दुर्जनानां विनाशाय, धर्मस्य च संस्थापनाय प्रत्येक युगे अवतरामि।

**मोक्षप्राप्तिः**

"जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।

त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥" (गीता ४/९)

हे अर्जुन मम एतत् जन्म कर्म च अलौकिकमिति यः पुरुषः यथार्थं जानाति सः शरीरत्यागे सति पुनर्जन्म नाप्नोति प्रत्युत मामेव प्राप्नोति।

**चातुर्वर्ण्यम्**

"चातुर्वर्ण्य मया सृष्टं गुणकर्मविभागशः।

तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥" (गीता ४/१३) इति

गुणानां कर्माणां च विभेदानुसारेण ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः इति चत्वारः वर्णाः मया कृताः। तस्य चातुर्वर्ण्यविभागस्य यद्यपि अहं कर्ता तथापि अहम् अकर्ता अनश्वरः च अस्मि, तदेतत् जानीहि।

**मुक्तिः**

"ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥" (गीता ५/१०) इति

यः पुरुषः सर्वाणि अपि कर्माणि ब्रह्मणे अर्पयित्वा सङ्गं त्यक्त्वा स्वाम्यर्थं भृत्यः इव कर्माणि आचरति सः पद्मपत्रं सरोवरे वर्तमानमपि जलेन यथा न लिप्यते तथा पापेन न लिप्यते ।

**योगिनां कर्म**

"कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।

योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥" (गीता ५/११) इति

योगिनः शरीरेण मनसा बुद्ध्या ईश्वराय एव कर्म करोमि न मम फलाय इति ममतां विना इन्द्रियैश्च कर्म आचरन्ति तेन तेषां चित्तं शुद्धं भवति ।

**ज्ञानेन मोक्षः**

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।

तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥" (गीता ५/१६)

येषाम् अज्ञानम् आत्मनः ज्ञानेन नाशितं भवति तेषां तत् ज्ञानं सूर्यः यथा समस्तं रूपजातं प्रकाशयति तथा परमात्मार्थतत्त्वं प्रकाशयति ।

"तबद्धयस्तदात्मानस्तन्निष्ठास्ततपरायणाः ।

गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥" (गीता ५/१७)

येषां बुद्धिः परमात्मनि रमते, चित्तं तत्रैव विहरति, स्थितिः सर्वदा तत्रैव सम्भवति, प्राप्यं च तत्त्वं स एव भवति तादृशाः ज्ञानेन कल्मषं नाशयन्तः पुरुषाः यतः पुनरागमनं न भवति तादृशं मोक्ष प्राप्नुवन्ति। यथा श्रुतिप्रमाणम् अपि अस्ति "न स पुनरावर्तते" । (छां.उ.) इति

### सन्न्यासिस्वरूपम्

"अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।

स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥" ((गीता ६/१) इति

यः कर्मफलम् अनपेक्षमाणः कर्म करोति सः सन्न्यासी इति उच्यते। सः एव योगी अपि। अग्नित्यागमात्रेण कोऽपि जनः सन्न्यासी न भवति। कर्मफलत्यागमात्रेण कोऽपि जनः योगी अपि न भवति। (अग्निरक्षणं गृहस्थस्य धर्मः। सन्न्यासाश्रमस्वीकारावसरे अग्नित्यागः क्रियते।)

"यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।

न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ॥" (गीता ६/२)

श्रुतिस्मृतिविदः यं सन्न्यास इति वदन्ति तमेव कर्मयोगं मन्यस्व। कुतः। यस्मिन् कर्मसन्न्यासो वर्तते तस्मिन् कर्मफलविषयकः अभिलाषो न भवति, तथा यस्मिन् कर्मयोगो वर्तते तस्मिन्नपि स कर्मफलविषयकः अभिलोषो न भवति। एवं कर्मफलविषयकाभिलाषत्यागस्य उभयत्र सद्भावात् तयोः सादृश्यमिति तौ उभौ एक एव न अनेकः।

### योगिनः स्वरूपम्

"ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।

युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥" (गीता ६/८) इति

गुरुणा उपदिष्टस्य ज्ञानेन प्रत्यक्षानुभवेन च यस्य चित्तं प्रसन्नं वर्तते यश्च निर्विकारः यश्च इन्द्रियाणां वशीकर्ता वर्तते, यस्य च मृत्पिण्डे पाषाणे सुवर्णे च समानताबुद्धिः सञ्जाता, तादृशः समाधौ मग्नः योगी इति कथ्यते। (ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानम्। विज्ञानं शास्त्रतो ज्ञातानां तथा एव स्वानुभवविषयीकरणम्।)

"प्रयत्नाद्यतमानस्तु योगी संशुद्धिकिल्बिषः ।

अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥" (गीता ८/४५) इति

पूर्वोक्तप्रकारेण यत्नेन योगे पुनः पुनः प्रवर्तमानस्य योगिनः सर्वाणि अपि पापानि विनश्यन्ति। विनष्टपापः सः बहुषु जन्मसु शुद्धो भूत्वा मुक्तिरूपां परमां गतिं प्राप्नोति।

"तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।

कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥" (गीता ८/४६) इति

कृच्छ्रचान्द्रायणादिरूपं तपः आचरभ्यः अपि योगी अधिकः। शास्त्रे पण्डितेभ्यः अपि योगी अधिकः। अग्निहोत्रादिकर्म आचरद्भ्यः अपि योगी अधिकः । अतः हे अर्जुन त्वं योगी भव ।

**भगवतः श्रीकृष्णस्य स्वरूपनिर्णयः**

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।

अहङ्कार इतीयं में भिन्ना प्रकृतिरष्टधा ॥" (गीता ७/ ४) इति

पृथिवी जलम् अनलः वायुः खं (आकाशं) मनः बुद्धिः अहङ्कारः च एव इति इयं मम प्रकृतिः अष्टभिः प्रकारैः भिन्ना भवति ।

"अपरेयमितस्त्वन्यां प्रकृतिं विद्धि में पराम् ।

जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥" (गीता ७/ ५) इति

महाबाहो अष्टधा विभक्ता इयं मम प्रकृतिः संसारबन्धनात्मिका अस्ति। अस्याः अन्या अपि मम प्रकृतिः अस्ति। प्रकृष्टा सा एव सर्वेषां प्राणधारिणी अस्ति। तया एव एतद् जगत् धार्यते।

"एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥" (गीता ७/६) इति

सर्वाणि भूतानि प्रकृतिसम्भवानि इति जानीहि। इदं समग्रं जगत् मत्त एव निर्गच्छति, मय्येव च लीनं भवति।

**ब्रह्मणः स्वरूपनिर्णयः**

"अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।

भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥" (गीता ८/३) इति

अत्युत्तमं विनाशरहितं सर्वव्यापकं च ब्रह्म इत्युच्यते। तादृशस्य ब्रह्मणः जीवरूपेण शरीरे अवस्थानम् अध्यात्ममिति उच्यते। सर्वेषां भूतानाम् उत्पत्तौ वृद्धौ च कारणीभूतः यज्ञः (देवतोद्देशेन चरुपुरोडाशादेः द्रवस्य विसर्जनम्) कर्म इति उच्यते।

"ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।

यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥" (गीता ८/१३) इति

सकलप्रवेशद्वाराणि (नवद्वाराणि) निगृह्य चित्तं हृदये संस्थाप्य च स्वस्य प्राणं शिरसि स्थापयित्वा समाधि प्राप्तः एकाक्षरं ब्रह्मवाचकत्वात् साक्षात् ब्रह्मस्वरूपम् ओङ्कारम् उच्चारयन् मां ध्यायन् यः मानवः शरीरं मुञ्चति स उत्कृष्टां गतिं लभते।

## गुणत्रयम्

"तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।

सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥" (गीता १४/ ६) इति

हे पापरहित अर्जुन तेषु त्रिषु गुणेषु स्वच्छत्वात् भासकं निरुपद्रवं सत्त्वं सुखं जनयति ज्ञानं च।

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।

तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥" (गीता १४/७) इति

अर्जुन अप्राप्ते वस्तुनि अभिलाषः तृष्णा, प्राप्ते वस्तुनि अभिलाषः सङ्ग। आभ्यां यो रागः सम्भवति तदात्मकः अयं रजोगुणः। अयं च आत्मानं कर्मसु प्रवर्तयति। प्रवृत्तश्च सः तत्र बद्धो भवति।

"तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।

प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥" (गीता १४/८) इति

अर्जुन यत् तृतीयं तमः तत् अज्ञानात् सम्भवति। इदं च तमः सर्वेषां प्राणिनां भ्रान्तिं जनयति। अनेन गुणेन सर्वेषाम् अनवधानं जाड्यं निद्रा च सम्भवति। एवमिदं तमः पुरुषं संसारे बध्नाति।

## द्विविधौ लोकौ

"द्वाविमौ पुरुषों लोके क्षरश्चाक्षर एव च ।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥" (गीता १५/१६) इति

अत्र लोके क्षरः अक्षरः चेति द्वौ पुरुषौ स्तः। तत्र क्षरः पुरुषो नाम महदादिः भूतान्तः सर्वोऽपि कार्यरूपः राशिः। स च विनाशी। अक्षरः मायाशब्देन या व्यवह्रियते सा प्रकृतिः। अयं निर्विकारत्वेन स्थितः कारणभागः।

## असुरस्वभावः

"प्रवृतिं च निवृतिं च जना न विदुरासुराः ।

न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥" (गीता १६/७) इति

असुरगुणसम्पन्नाः जनाः धर्मे प्रवृतिं न जानन्ति, अर्धमात् च निवृत्तिम्। कायिकं वाचिकं मानसिकं चेति यत् त्रिविधं शौचं तत् तेषु न सम्भवति। नापि यथार्थवादित्वम्।

## त्रिविधा श्रद्धा

"सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।

श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥" (गीता १७/३) इति

सात्विकी राजसी तामसी चेति त्रिविधा श्रद्धा भवति। अधुना तेषां स्वरूपम् उच्यते

"यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।

प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥" (गीता १७/४) इति

तत्र येषु सत्त्वं वर्तते ते देवान् पूजयन्ति। येषु च रजः ते यक्षान् राक्षसान् च पूजयन्ति। येषु पुनः तमः ते प्रेतान् भूतान् च पूजयन्ति।

## पुनरावृत्तिः (Recap)

- स्मृतिप्रस्थानं गीताप्रस्थानम् इति कथ्यते।
- महाभारतस्य शान्तिपर्वणि अन्तर्भूता श्रीमद्भगवद्गीता परमपुरुषेण वासुदेवेन द्वापरे कुरुक्षेत्रे अर्जुनाय समुपदिष्टा।
- कृष्णद्वैपायनव्यासेन सप्तशतश्लोकैः उपनिबद्धा।
- श्रुतौ प्रतिपादितः अर्थः एव स्मृतिप्रस्थाने आलोच्यते।
- गीतायां प्रवृत्तिलक्षणं निवृत्तिलक्षणधर्म च व्याख्यातम्।
- आत्मनः स्वरूपनिर्णयः कृतः अस्ति। ततः परं स्थितप्रज्ञस्य लक्षणमपि कृतम् अस्ति।
- चतुर्णां वर्णानामपि स्वरूपनिर्णयः कृतः अस्ति।
- योगिनाम् अपि कर्म उक्त्वा तेषां स्वरूपनिर्णयः कृतः अस्ति।
- सन्न्यासिनां स्वरूपम् उक्त्वा ब्रह्मणः अपि स्वरूपं विचारितम् अस्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. गीतायां कति अध्यायाः सन्ति ?
2. श्रीमद्भगवद्गीतायां कः कस्मै उपदेशं दत्तवान्?
3. श्रीमद्भगवद्गीतां कः रचयामास ?
4. गीतायां कति श्लोकाः सन्ति ?
5. चातुर्वर्ण्यं कस्मात् सृष्टम्?
6. गीतायाः अपरं नाम किं ?
7. आत्मा नित्यो वा अनित्यो वा ?
8. गीतायाः द्वितीयोऽध्यायस्य नाम ?
9. महाभारतस्य कस्मिन् पर्वणि भगवद्गीता अन्तर्भूता ?
10. विश्वरूपदर्शनं गीतायां कस्मिन् अध्याये अस्ति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. योगस्य लक्षणम् एकं लिखत।

2. स्थितप्रज्ञस्य लक्षणम् एकं लिखत।
3. प्रकृतिः कतिविधा भवति ? के च ते ?
4. सन्यासिस्वरूपं किम्?
5. द्विविधौ धर्मलक्षणौ कौ तौ ?
6. ज्ञानेन मोक्षः कथं भवति ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. गीतायां योगस्वरूपं वर्णयत।
2. स्थितप्रज्ञस्य लक्षणं विस्तरेण विचारयत।
3. भगवतः श्रीकृष्णस्य स्वरूपनिर्णयं कुरुत।

## निर्दिष्टाभ्यासः (Assignments)

1. प्रस्थानत्रये गीतायाः महत्वम्।
2. प्रस्थानत्रयम् - लघुप्रबन्धं रचयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. अष्टादश
2. श्रीकृष्णः अर्जुनाय
3. महर्षिः व्यासदेवः
4. सप्तशतश्लोकाः
5. गुणकर्मविभागशः
6. भगवद्गीतोपनिषद्
7. नित्यः
8. साङ्ख्ययोगः
9. शान्तिपर्वणि
10. एकादशाध्याये

## सूचनाग्रन्थाः (References)


1. Bhagavad Gita with commentary of Swami Chinmayananda (chinmaya Publications, Ernakulam)
2. Bhagavad Gita with Sivaravinda bhashya by Prof. G.Balakrishnan Nair, State Institute of Languages, Kerala, Thiruvananthapuram.
3. श्रीमद्भगवद्गीता, साधकसंजीवनी, गीताप्रेस्, गोरखपुर् ।
4. श्रीमद्भगवद्गीता, शाङ्करभाष्य हिन्दी अनुवाद सहित, अनुवादकः - श्रीहरिकृष्णदास् गोयन्दका।

# Unit - 2

## भगवद्गीता - द्वितीयेऽध्याये १ - १५ श्लोकाः

### उद्देश्यानि (Learning Outcomes)

- आत्मतत्त्वं ज्ञास्यति।
- धर्माधर्मविषययोः ज्ञानम् लभेत।
- सन्न्यासस्य स्वरूपं ज्ञास्यति।
- गीतायाः सारः ज्ञास्यति।

### प्राग्व्यपेक्षाः (Prerequisites)

एषः द्वितीयः अध्यायः विद्यते। निष्कामकर्मयोगस्य प्रक्रियायां कर्ता कर्तृत्वस्य अभिमानं विना कर्मणि प्रवर्तते, किन्तु तादृशः कर्ता कश्चित् ज्ञानी पुरुषः एव भवति। ईश्वराय कर्मणां समर्पणमपि ज्ञानीजन एव स्वकीयेन भक्ति - प्रवणेन चेतसा विदधाति। अतः श्रीमद्भगवद्गीता ज्ञानमार्गस्यापि महत्त्वं स्वीकरोति। गीतोक्तज्ञानयोगः वस्तुतः सांख्यशास्त्रादिषु कथितात् ज्ञानमार्गात् भिन्नो वर्तते। श्रीमद्भगवद्गीतायां ज्ञानयोगस्य विषयः प्रतिपादितः, तदनुसारेण ज्ञानम् आत्मनः एकतायाः पूर्णानुभवोऽस्ति। अस्य ज्ञानस्य अवस्थाद्वयं विद्यते। प्रथमावस्थायां सर्वभूतेषु आत्मनो दर्शनं ज्ञानं वर्तते, द्वितीयावस्थायां सर्वभूतानाम् आत्मनि दर्शनज्ञानम् अस्ति।

सर्वभूतेषु आत्मानं दर्शयेदिति यज्ज्ञानमस्ति तत्र सर्वे भूताः प्राणिनो वा आधाररूपाः सन्ति, आत्मा चाधेयरूपोऽस्ति। सर्वभूतानामात्मनि दर्शने सति आत्मा आधाररूपो भवति, आधेयरूपाः सर्वे भूताश्च तम्नुभूयन्ते। गीतोक्तज्ञानयोगस्य इदम् अवस्थाद्वयं परस्परं सम्पूरकतया तिष्ठति। यः पुरुषोऽस्य ज्ञानयोगे गृह्यमाणस्य अवस्थाद्वयस्य व्यवहारे सम्प्रयोक्ता भवति, स समदर्शीति उच्यते। तादृशज्ञानिनां कृते श्रीमद्भगवदगीताया उद्घोषोऽस्ति 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" इति।

## मुख्यपदानि (Keywords)

अश्रुपूर्णाकुलेक्षणम्,कश्मलं, विषीदन्तं, अनार्यजुष्टं, क्लैब्यं,अहत्वा, रुधिरप्रदिग्धान्, भुञ्जीय,जिजीविषामः, कार्पण्यं, व्यथयन्ति।

## Discussion

**सञ्जय उवाच -**

**तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।**
**विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥**

**पदच्छेदः** -

कृपया + आविष्टं + अश्रुपूर्णाकुलेक्षणम् - कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।

विषीदन्तं + इदं - विषीदन्तमिदम्।

वाक्यं + उवाच - वाक्यमुवाच।

**अन्वयः** - तथा कृपया आविष्टम् अश्रुपूर्णाकुलेक्षणं विषीदन्तं तं मधुसूदनः इदं वाक्यं उवाच।

**अर्थः** - तथा - पूर्वोक्तप्रकारेण (शोकसंविग्नमानसः अर्जुनः शरसंयुक्तं चापम् उपेक्ष्य रथे उपाविशत् इत्युक्तप्रकारेण),कृपया - अनुकम्पया (दयया),आविष्टं - युक्तं (सहितम्),अश्रुपूर्णाकुलेक्षणं - अश्रुभिः पूरितत्वात् आकुलं (अव्यक्तं) ईक्षणं (दर्शनं) यस्य तादृशं, विषीदन्तं - विषण्णं (दुःखितं),तं - अर्जुनं,मधुसूदनः - श्रीकृष्णः, इदं वाक्यं - वक्ष्यमाणं वाक्यं, उवाच - उक्तवान् ।

**सारः** - कुरुक्षेत्रभूमौ स्वस्य शत्रुपक्षे युद्धार्थमागतान् आचार्यान् तथा स्वबान्धवादीन् च दृष्ट्वा शोकसंविग्नमानसं कृपया आविष्टम् अश्रुपूर्णदृष्टिं विषण्णमर्जुनं प्रति श्रीकृष्णः वक्ष्यमाणप्रकारं वाक्यम् उवाच।

**श्रीभगवान् उवाच -**

**कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।**
**अनार्यजुष्टमास्वर्ग्यमकीर्तिकरमर्जुन ॥**

**पदच्छेदः** -

कुतः + त्वा - कुतस्त्वा।

कश्मलम् + इदम् - कश्मलमिदम्।

अनार्यजुष्टं + अस्वर्ग्यं +अकीर्तिकरं + अर्जुन - अनार्यजुष्टमास्वर्ग्यमकीर्तिकरमर्जुन।

**अन्वयः** - हे अर्जुन ! अनार्यजुष्टं अस्वर्ग्यं अकीर्तिकरं इदं कश्मलं विषमे समुपस्थितं त्वा (त्वां) कुतः (आक्रान्तं)।

**अर्थः** - हे अर्जुन ! ,अनार्यजुष्टं - अनार्यैरेव आचरितं (आर्यैः नाचरितं),अस्वर्ग्यं - स्वर्गप्राप्त्यसाधनभूतं,अकीर्तिकरं - अकीर्तिजनकं, इदं कश्मलं - अयं विषादः, विषमे समुपस्थितं त्वां - सन्दिग्धावस्थायां स्थितं त्वां, कुतः - कस्मात् देशात् ग्रस्तम् ?

**सारः** - हे अर्जुन ! अनार्यैराचरितं स्वर्गप्राप्त्यसाधनभूतम् अकीर्तिजनकम् इदं कश्मलं विषमावस्थायां वर्तमानं त्वां कुतः ग्रस्तम् ?

**क्लैब्यं मा स्म गमः पार्थ ! नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥**

**पदच्छेदः** -

न + एतत् + त्वयि + उपपद्यते - नैतत्त्वय्युपपद्यते

त्यक्त्वा + उत्तिष्ठ - त्यक्त्वोत्तिष्ठ।

**अन्वयः** - हे पार्थ ! त्वं क्लैब्यं मास्म गमः। एतत् त्वयि न उपपद्यते । हे परंतप ! क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ ।

**अर्थः** - हे पार्थ ! - हे अर्जुन !, क्लैब्यं - क्लीबभावं, मा स्म गमः - मा स्वीकुरु, एतत् - क्लैब्यं, त्वयि न उपपद्यते - त्वयि अर्जुने नोपपन्नं भवति , हे परंतप - हे अर्जुन !, क्षुद्रं - तुच्छं, हृदयदौर्बल्यं - मनोव्यथां, त्यक्त्वा - उपेक्ष्य, उत्तिष्ठ - युद्धाय सज्जो भव ।

**सारः** - हे अर्जुन ! त्वमिदानीं इमं क्लीबभावं परित्यज एतत् क्लैब्यं त्वत्सदृशे कदापि नोपपन्नं भवति । अतः तव मनोव्यथाम् उपेक्ष्य युद्धाय कृतनिश्चयः सन् उत्तिष्ठ ।

**अर्जुन उवाच -**

**कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन।**
**इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन॥**

**पदच्छेदः** -

भीष्मम् + अहं - भीष्ममहं।

पूजार्हौ + अरिसूदन - पूजार्हावरिसूदन।

**अन्वयः** - हे मधुसूदन ! अहं संख्ये भीष्मं द्रोणं च इषुभिः कथं प्रतियोत्स्यामि। हे अरिसूदन ! तौ मम पूजार्हौ।

**अर्थः** - हे मधुसूदन ! - हे श्रीकृष्ण !, अहं - अर्जुनोऽहं, संख्ये - संग्रामे (युद्धे), भीष्मं - भीष्माचार्यं, द्रोणं - द्रोणाचार्यं च, इषुभिः बाणैः,कथं प्रतियोत्स्यामि - कथं युद्धं करिष्यामि ?, हे अरिसूदन ! - हे शत्रुनाशक, तौ - भीष्मद्रोणौ, मम पूजार्हौ - पूजनीयौ आचार्यौ भवतः।

**सारः** - हे श्रीकृष्ण ! भीष्मद्रोणौ मम पूजार्हौ आचार्यौ भवतः। अस्मिन् युद्धे कथमहं तौ बाणैः प्रतियोत्स्यामि ? न शक्नोमीत्याशयः।

**गुरूनहत्वा हि महानुभवान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके।**
**हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्॥**

**पदच्छेदः** -

गुरून् + अहत्वा - गुरूनहत्वा।

भैक्ष्यं + अपि + इह - भैक्ष्यमपीह।

हत्वा + अर्थकामान् + तु - हत्वार्थकामांस्तु।

गुरून् +इह + एव - गुरूनिहैव।

**अन्वयः** - महानुभावान् गुरून् अहत्वा इह लोके भैक्ष्यमपि भोक्तुं श्रेयः हि। अर्थकामान् गुरून् हत्वा तु इहैव रुधिरप्रदिग्धान् भोगान् भुञ्जीय।

**अर्थः** - महानुभावान् - महात्मनः, गुरून् - आचार्यान्, अहत्वा - अनिहत्य, इह लोके - अस्मिन् लोके, भैक्ष्यमपि - भिक्षाटनेन लब्धमन्नमपि, भोक्तुं - भक्षितुं, श्रेयः हि - युक्तः, अर्थकामान् गुरून् - धनकाङ्क्षिणः गुरून्, हत्वा - निहत्य तु, इहैव - अस्मिन्नेव लोके, रुधिरप्रदिग्धान् - शोणितसंस्पृष्टान्, भोगान् - विषयान्, भुञ्जीय - अनुभवेयम्।

**सारः** - भीष्मद्रोणादीन् महानुभावान् गुरून् अनिहत्य भिक्षाटनेन लब्धेन अन्नेन जीवनमपि लोके श्रेयस्करम्। धनकाङ्क्षिणः गुरून् निहत्य तु अस्मिन्नेव लोके शोणितसंस्पृष्टान् विषयान् अनुभवेयम्।

**न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।**
**यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥**

**पदच्छेदः** -

च + एतत् + विद्मः - चैतद्विद्मः ।

कतरत् + नः+ गरीयाः+ यत् - कतरन्नो गरीयो यत् ।

यत् + वा - यद्वा ।

नो+जयेयुः- नोजयेयुः ।

यान् + एव - यानेव ।

जिजीविषामः + ते + अवस्थिताः - जिजीविषामस्तेऽवस्थिताः ।

**अन्वयः** - यत् वा (वयं) जयेम यदि वा नः जयेयुः नः कतरत् गरीयः इति एतत् च न विद्मः । यान् हत्वा न जिजीविषामः एव ते धार्तराष्ट्राः प्रमुखे अवस्थिताः ।

**अर्थः** - यत् वा - यदि वा, वयं - पाण्डवाः, जयेम - तान् कौरवान् जयेम, यदि वा - यद्वा, ते - कौरवाः, नः - अस्मान् पाण्डवान्, नः - अस्माकं पाण्डवानां, कतरत् - उभयोर्मध्ये कः, गरीयः - महत्तरः, इति एतत् न विद्मः - इत्येतत् न जानीमः, यान् - बान्धवान्, हत्वा - निहत्य, न जिजीविषामः - न जीवितुमपि इच्छामः, ते धार्तराष्ट्राः - ते कौरवाः, प्रमुखे - अस्माकं सम्मुखे, आवास्थिताः - अवतिष्ठन्ति ।

**सारः** - कौरवपाण्डवयोर्मध्ये आगामिनि युद्धे कस्य जयः महत्तरः इति अहमिदानीं न जानामि । यान् बान्धवान् रणे हत्वा जीवितुमपि नेच्छामि ते कौरवाः अस्माकं पुरतः युद्धाय इदानीमवस्थिताः ।

**कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।**
**यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥**

**पदच्छेदः** -

यत् + श्रेयः - यच्छ्रेयः ।

स्यात् + निश्चितं - स्यान्निश्चितं ।

तत् + मे - तन्मे ।

शिष्यः + ते + अहं - शिष्यस्तेऽहं ।

**अन्वयः** - कार्पण्यदोषोपहतस्वभावः धर्मसम्मूढचेताः त्वां यत् श्रेयः स्यात् तत् मे निश्चितं ब्रूहि इति पृच्छामि। अहं ते शिष्यः। त्वां प्रपन्नं मां शाधि।

**अर्थः** - कार्पण्यदोषोपहतस्वभावः - आत्मज्ञानरहितः यः स्वल्पमपि वित्तनाशं न क्षमते सः कृपणः, तस्य भावः कार्पण्यं, कार्पण्यदोषेण नष्टस्वभावः, धर्मसंमूढचेताः - कर्तव्यज्ञानरहितः (अहं), त्वां - श्रीकृष्णं, यत् श्रेयः स्यात् - यत् मम श्रेयः प्राप्तिसाधनं स्यात्, तत् निश्चितं ब्रूहि - तत् निश्चित्य मां उपदिशतु, अहं ते शिष्यः - अर्जुनोऽहं तव शिष्यः अस्मि, त्वां प्रपन्नं - भवन्तं शरणागतं, मां शाधि - मां अनुगृह्णातु।

**सारः** - आत्मज्ञानराहित्यरूपेण कार्पण्यदोषेण नष्टस्वभावः अहं स्वकर्तव्यविषये सन्दिग्धोऽस्मि । मम श्रेयः प्राप्तिसाधनं किमिति निश्चित्य मां ब्रूहि इति भवन्तं पृच्छामि । त्वां शरणागतं शिष्यं मां अनुगृह्णातु इति मे प्रार्थना।

**नहि प्रपश्यामि ममापबुद्यात् यच्छोकमुच्छोषणमिन्द्रियाणाम्।**
**अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्॥**

**पदच्छेदः** -

मम + अपनुद्यात् - ममापनुद्यात्।

यत् + शोकं + उच्छोषणम् + इन्द्रियाणां - यच्छोकमुच्छोषणमिन्द्रियाणाम्।

भूमौ + असपत्नं + ऋद्धं - भूमावसपत्नमृद्धं।

सुराणां + अपि - सुराणामपि।

च + आधिपत्यं - चाधिपत्यम्।

**अन्वयः** - भूमौ असपत्नं ऋद्धं राज्यं सुराणां आधिपत्यं च अवाप्य अपि इन्द्रियाणां उच्छोषणं मम शोकं यत् अपनुद्यात् इति न प्रपश्यामि हि ।

**अर्थः** - भूमौ - पृथिव्यां ,असपत्नं - शत्रुहीनं, ऋद्धं राज्यं - समृद्धं राज्यं, सुराणां - देवानां, आधिपत्यं - नियन्तृत्वं, अवाप्य अपि - लब्ध्वा अपि, इन्द्रियाणां उच्छोषणं - इन्द्रियाणां शोषकं,मम शोकं - मम दुःखं, यत् अपनुद्यात् - यत् नाशयेत् , इति न प्रपश्यामि - इति न जानामि।

**सारः** - लोकेऽस्मिन् शत्रुहीनं समृद्धं च राज्यं देवानामाधिपत्यं च लब्ध्वा अपि इन्द्रियाणां शोषकं मम दुःखं यत् नाशयेत् इति अहमिदानीं न जानामि।

**सञ्जय उवाच -**

**एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः।**
**न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥**

**पदच्छेदः** -

एवं + उत्त्वा - एवमुत्त्वा।

गोविन्दं + उक्त्वा - गोविन्दमुक्त्वा।

**अन्वयः** - परंतपः गुडाकेशः हृषीकेशं एवम् उक्त्वा (पुनः) न योत्स्ये इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह।

**अर्थः** - परंतपः - शत्रुतापनः, गुडाकेशः - अर्जुनः, हृषीकेशं - श्रीकृष्णं, एवमुक्त्वा - एवं स्वाभिप्रायं प्रकटीकृत्य, न योत्स्ये - अहं युद्धं न करिष्यामि, इति गोविन्दमुक्त्वा - इति श्रीकृष्णं प्रति उक्त्वा, तूष्णीं बभूव ह - किञ्चिदनुवर्तत ।

**सारः** - शत्रुतापनः अर्जुनः श्रीकृष्णं प्रति पूर्वोक्तरूपं स्वाभिप्रायं प्रकटीकृत्य अहं न युद्धं करिष्यामि इति उक्त्वा तूष्णीं अवर्तत ।

**तमुवाच हृषीकेशः प्रहसन्निव भारत।**
**सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥**

**पदच्छेदः** -

तम् + उवाच - तमुवाच।

प्रहसन् + इव - प्रहसन्निव।

सेनयोः + उभयोः + मध्ये - सेनयोरुभयोर्मध्ये।

विषीदन्तम् + इदं - विषीदन्तमिदं।

**अन्वयः** - हे भारत ! उभयोः सेनयोः मध्ये विषीदन्तं तं हृषीकेशः प्रहसन् इव इदं वचः उवाच।

**अर्थः** - हे भारत ! - हे धृतराष्ट्र!, उभयोः सेनयोः - कौरवपाण्डवसेनयोः, मध्ये - मध्यभागे स्थितं, विषीदन्तं तं - विषण्णमनस्कं तं अर्जुनं, हृषीकेशः - श्रीकृष्णः, प्रहसन्निव - हसन्निव, इदं - वक्ष्यमाणं, वचः - वाक्यं, उवाच- उक्तवान्।

**सारः** - परस्परं योद्धुमागतयोः कौरवपाण्डवसेनयोः मध्ये स्थितं विषण्णमानमर्जुनं श्रीकृष्णः हसन्निव वक्ष्यमाणं उपदेशं दत्तवान्।

**श्रीभगवानुवाच** -

**अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।**
**गतासूनगतांसूश्च नानुशोचन्ति पण्डिताः ॥**

**पदच्छेदः** -

अशोच्यान् + अन्वशोचः + त्वं - अशोच्यानन्वशोचस्त्वं।

प्रज्ञावादान् + च - प्रज्ञावादांश्च।

गतासून् + आगतासून् + च - गतासूनगतांसूश्च।

न + अनुशोचन्ति - नानुशोचन्ति।

**अन्वयः** - त्वम् अशोच्यान् अन्वशोचः, प्रज्ञावादान् भाषसे च। पण्डिताः गतासून् अगतासून् च न अनुशोचन्ति ।

**अर्थः** - त्वं - अर्जुनः त्वं, अशोच्यान् - शोकानर्हान् उद्दिश्य, अन्वशोचः - अनुशोचितवान्, प्रज्ञावादान् - प्रज्ञावतां (बुद्धिमतां) वादान् (वचनानि), भाषसे - वदसि च । पण्डिताः - आत्मज्ञानिनः, गतासून् - गतप्राणान् (मृतान्), अगतासून् - आगतप्राणान् (जीवतः) च उद्दिश्य, नानुशोचन्ति - शोकं न कुर्वन्ति।

**सारः** - हे अर्जुन ! त्वं भीष्मद्रोणादीन् शोकानर्हान् उद्दिश्य इदानीम् अनुशोचितवान्। तदानीमेव बुद्धिमन्त इव त्वं भाषसे च । आत्मज्ञानिनः जीवतः मृतान् च उद्दिश्य न अनुशोचन्ति इत्येतत् प्रसिद्धं हि लोके।

**न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।**
**न चैव न भविष्यामः सर्वे वयमतः परम्॥**

**पदच्छेदः** -

तु + एव + अहं - त्वेवाहं।

न + आसं - नासं।

न + इमे - नेमे।

च + एव - चैव।

वयं + अतः - वयमतः।

**अन्वयः** - अहं जातु न आसं इति । न एव। त्वं अपि (न आसीः इति न ) इमे जनाधिपाः (अपि जातु न आसन् इति न) सर्वे वयं अतः परं न भविष्यामः इति च नैव।

**अर्थः** - अहं जातु - कदाचित्, न आसं - न अभवं, इति न - इत्येतत् न युक्तम्। अहं सर्वदा आसमेव इति यावत्। इमे जनाधिपाः - इमे राजानः, अपि न आसन् इति न - न अभवन् इति न (सर्वदा आसन् एवेत्यर्थः) सर्वे वयं, अतः - देहनाशात्, परम् - उत्तरकाले, न भविष्यामः इति च न - भविष्याम एव।

**सारः** - अहं सर्वदा आसम्, त्वमपि सर्वदा आसीः, इमे राजानः च सर्वदा आसन् एवेत्यतः सर्वे वयं नित्याः, अत एव अशोच्याः इत्याशयः।

**देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।**
**तथा देहान्तरप्राप्तिः धीरस्तत्र न मुह्यति॥**

**पदच्छेदः** -

देहिनः + अस्मिन् - देहिनोऽस्मिन्।

धीरः + तत्र - धीरस्तत्र।

**अन्वयः** - यथा देहिनः अस्मिन् देहे कौमारं यौवनं जरा (च भवन्ति) तथा देहान्तरप्राप्तिः (भवति)। तत्र धीरः न मुह्यति।

**अर्थः** - यथा - येन प्रकारेण, देहिनः - आत्मनः, अस्मिन् देहे - वर्तमाने शरीरे, कौमारं - बाल्यावस्था, यौवनं - मध्यमावस्था, जरा - वार्धक्यं (चेति तिस्रः अवस्थाः संभवन्ति) तथा - तेनैव प्रकारेण, देहान्तरप्राप्तिः - शरीरान्तरस्वीकारः। तत्र - तस्मिन् विषये, धीरः - बुद्धिमान्, न मुह्यति - न मोहमापद्यते ।

**सारः** - यथा अस्मिन् शरीरे कौमारं यौवनं वार्धक्यं चेति परस्परभिन्नाः तिस्राः अवस्थाः आत्मनः दृष्टाःतथा अविक्रियस्य एकस्य आत्मनः एव देहान्तरप्राप्तिरपि दृश्यते। विषयेऽस्मिन् बुद्धिमान् न मोहमापद्यते।

**मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥**

**पदच्छेदः** -

मात्रास्पर्शाः + तु - मात्रास्पर्शास्तु।

आगमापायिनः + अनित्याः + तान् + तितिक्षस्व - आगमापायिनोऽनित्यास्तांस्तितिक्षस्व।

**अन्वयः** - हे कौन्तेय ! मात्रास्पर्शाः तु शीतोष्णसुखदुःखदाः आगमापायिनः अनित्याः (च भवन्ति)। (तस्मात्) हे भारत ! तान् तितिक्षस्व।

**अर्थः** - हे कौन्तेय - हे अर्जुन, मात्रास्पर्शाः - मात्राणां (इन्द्रियाणां) स्पर्शाः (विषयसंबन्धाः) तु शीतोष्णसुखदुःखदाः - शीतोष्णसुखदुःखप्रदातारः, आगमापायिनः - उत्पत्तिविनाशशीलाः, अनित्याः - अत एव अनित्याः। तस्मात् हे भारत ! - हे अर्जुन! तान् इन्द्रियाणां विषयसंबन्धान्, तितिक्षस्व - तेषु हर्षं विषादं वा माकार्षीः।

**सारः** - इन्द्रियाणां शब्दादिभिः विषयैः सह संयोगाः शीतोष्णसुखदुःखप्रदातारः, उत्पत्तिविनाशशीलाः अनित्याश्च भवन्ति। तस्मात् हे अर्जुन ! तान् शीतोष्णादीन् सहस्व इत्यर्थः।

**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥**

**पदच्छेदः** -

व्यथयन्ति + एते - व्यथयन्त्येते।

सः + अमृतत्वाय - सोऽमृतत्वाय।

**अन्वयः** - हे पुरुषर्षभ ! एते समदुःखसुखं धीरं यं पुरुषं न व्यथयन्ति हि सः अमृतत्वाय कल्पते।

**अर्थः** - हे पुरुषर्षभ ! - हे पुरुषश्रेष्ठ !, एते - विषयेन्द्रियसंयोगाः, समदुःखसुखं - सुखदुःखप्राप्तौ हर्षविषादरहितं, धीरं - विवेकिनं, यं - पुरुषं, न व्यथयन्ति - न चालयन्ति, सः - आत्मस्वरूपज्ञः, अमृतत्वाय - मोक्षाय, कल्पते - समर्थो भवति।

**सारः** - हे अर्जुन ! विषयेन्द्रियसंयोगाः सुखदुःखप्राप्तौ हर्षविषादहीनं यं विवेकिनं पुरुषं न चालयन्ति सः आत्मस्वरूपज्ञानी मोक्षप्राप्तये समर्थो भवति।

## पुनरावृत्तिः (Recap)

- भगवान् श्रीकृष्णः अर्जुनस्य शोचनीयां अवस्थां दृष्टवान्।

- भीष्मद्रोणादीनां हननेन प्राप्यमाणाः ये भोगाः रक्तलिप्ताः भविष्यन्ति तेषाम् उपभोगः सर्वथा नोचितः।
- युद्धे अन्यस्य हननम् अन्यस्य च जीवनम् इत्येतत् अवश्यम्भावि।
- तस्मात् यदि वयं जीवनम् इच्छामः तर्हि अवश्यं तेषां मरणं कांक्षणीयम्।
- विवेकिनः मृतेषु जीवत्सु च शोकं न कुर्वन्ति।
- आत्मनः कौमारं यौवनं जरा चेत्येवं अवस्थाः यथा भवन्ति तथा देहान्तरप्राप्तिः अपि भवति।
- द्वन्द्वसहिष्णुः जनः मोक्षं प्राप्तुं योग्यः भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. पूजार्हौ आचार्यौ कौ ?
2. भगवान् श्रीकृष्णः कस्य शोचनीयाम् अवस्थां दृष्टवान् ?
3. भगवान् श्रीकृष्णः अर्जुनं किं त्यक्तुमुपायं वदति ?
4. अर्जुनः किं ददाति ?
5. जीवनं इच्छामः तर्हि किं काङ्क्षणीयम् ?
6. धर्मविषये मम चेतः .... अस्ति । रिक्तस्थानं पूरयत।
7. सञ्जयः अर्जुनस्य योद्धोपरामस्य निर्णयं कं श्रावयति ?
8. किं सर्वथा अयोग्यः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. श्रीकृष्णः अर्जुनं प्रति किं त्यक्त्वा युद्धार्थं सन्नद्धो भव इति वदति ?
2. श्रीकृष्णः अर्जुनस्य सर्वाणि कारणानि अयोग्यानि इति उक्तवान्। कस्मात् कारणात् ?
3. युद्धे किम् अवश्यंभावि ?
4. किमुक्त्वा अर्जुनः तूष्णीम् अभवत् ?
5. कथं शोकात् निवृत्तिः भवति ?
6. तितिक्षा का ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. कथं कापुरुषत्वं प्रदर्शितम् ?
2. श्रीकृष्णेन उक्तानि वचनानि अर्जुनस्य उपरि अत्यन्तं प्रभावमकुर्वन् । तानि वचनानि कानि ?
3. अर्जुनः युद्धोपरामनिर्णयस्य स्पष्टनिरूपणं करोति । विशदयत
4. शोकः किमर्थं न करणीयः ?
5. आत्मनः अवस्थाः के ? विशदयत

## निर्दिष्टाभ्यासः (Assignments)

1. अर्जुनस्य अवस्थाविशेषमधिकृत्य उपन्यस्यत।
2. पण्डितलक्षणानि अधिकृत्य स्पष्टयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. भीष्मद्रोणौ।
2. अर्जुनस्य।
3. कापुरुषताम्।
4. श्रीकृष्णस्य धर्मादिकथनस्य उदाहरणम्।
5. मरणम्।
6. सम्मूढम् ।
7. धृतराष्ट्रम्।
8. शोकः।

## सूचनाग्रन्थाः (References)


1. Bhagavad Gita with commentary of Swami Chinmayananda (chinmaya Publications, Ernakulam)
2. Bhagavad Gita with Sivaravinda bhashya by Prof. G.Balakrishnan Nair, State Institute of Languages, Kerala, Thiruvananthapuram.
3. श्रीमद्भगवद्गीता, साधकसंजीवनी, गीताप्रेस्, गोरखपुर्।
4. श्रीमद्भगवद्गीता, शाङ्करभाष्य हिन्दी अनुवाद सहित, अनुवादकः - श्रीहरिकृष्णदास् गोयन्दका, संस्करणं २५

# Unit - 3
## भगवद्गीता द्वितीयेऽध्याये १६ - ३० श्लोकाः

### उद्देश्यानि (Learning Outcomes)

- अविकारिणः आत्मनः स्वरूपं वर्णयति।
- देहिनः निर्विकारत्वम् उपस्थापयति।
- आत्मनः शोकरहितत्वं प्रदर्शयति।
- आत्मनः वैशिष्ट्यं वर्णयति।

### प्राग्व्यपेक्षाः (Prerequisites)

पूर्वस्मिन् श्लोके देहदेहिनोः विवेचनं कृत्वा अत्र भगवान् देहादेहिनोः विस्तरेण विवेचनं कर्तुं सदसतोः लक्षणं वदति। सः कथयति यत्, असतः भावः सतः अभावः च न विद्यते। अविनाशिनः विनाशं कर्तुं न कोऽपि समर्थः इति। अविनाशिनः, अप्रमेयस्य, नित्यस्य चास्य शरीरिणः शरीराणि अन्तयुक्तानि उच्यन्ते। यः मनुष्यः एनम् अविनाशिनं शरीरिणं हन्यमानत्वेन पश्यति, सः मनुष्यः एनं मृतं च मन्यते। एतत् शरीरी न कदापि जायते, न च म्रियते। सः उत्पन्नः सन् पुनः जातः इत्यपि नास्ति। सः जन्मरहितः, नाशः, शाश्वतः, पुराणः, (अनादिः)च। शरीरी अविनाशी, नित्यः, अजः, अव्ययश्च इत्युक्त्वा षड्विकाराणां निषेधं करोति। आत्मनः नित्यत्वेन सह शोकरहितत्वमपि बोधयति। भगवान् श्रीकृष्णः जन्ममृत्वोः अपरिहार्यतायां सत्यां शोकः अनुचितः इति बोधयति। आत्मज्ञानस्य करणनिरपेक्षत्वं बोधयित्वा अन्तिमश्लोकेन भगवान् आत्मतत्त्वस्य अवध्यत्वं बोधयति।

### मुख्यपदानि (Keywords)

तत्वदर्शिभिः,अनाशिनः,जीर्णानि,क्लेदयन्ति , शाश्वतः,अच्छेद्यः,अदाह्यः,अक्लेद्यः, अशोष्यः, अवध्यः।


SGOU

## Discussion

**नासतो विद्यते भावो नाभावो विद्यते सत।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥**

**पदच्छेदः** -

न + असतः - नासतः।

न + अभावः - नाभावः।

उभयोः + अपि - उभयोरपि।

दृष्टः + अन्तः + तु + अनयोः + तत्त्वदर्शिभिः - दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।

**अन्वयः** - असतः भावः न विद्यते, सतः अभावः न विद्यते। अनयोः उभयोः अपि अन्तः तत्त्वदर्शिभिः दृष्टः।

**अर्थः** - असतः - अविद्यमानस्य, भावः - अस्तित्वं, न विद्यते - नास्ति। सतः - विद्यमानस्य आत्मनः, अभावः - अभावरूपत्वं, न विद्यते - नास्त्येव। अनयोः उभयोः अपि - सदसतोः उभयोरपि, अन्तः - निर्णयः, तत्त्वदर्शिभिः - ब्रह्मज्ञानिभिः, दृष्टः - गृहीतः (उपलब्धः)।

**सारः** - असतः भावरूपत्वं सतः अभावरूपत्वं वा न विद्यते इत्येतत् तत्त्वं तत्त्वज्ञानिभिः दृष्टम्।

**अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।**
**विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥**

**पदच्छेदः** -

तत् + विद्धि - तद्विद्धि।

सर्वं + इदं - सर्वमिदं।

विनाशं + अव्ययस्य + अस्य - विनाशमव्ययस्यास्य।

कश्चित् + कर्तुं + अर्हति - कश्चित्कर्तुमर्हत।

**अन्वयः** - येन इदं सर्वं ततं तत् तु अविनाशि (इति) विद्धि। अव्ययस्य अस्य विनाशं कर्तुं कश्चित् न अर्हति।

**अर्थः** - येन - आत्मस्वरूपेण, इदं सर्वं - दृश्यमानमिदं जगत्, ततं - व्याप्तं, तत् - आत्मतत्वं, अविनाशि - नाशरहितं, इति विद्धि - जानीहि, अव्ययस्य - नाशरहितस्य, अस्य - आत्मतत्त्वस्य, विनाशं कर्तुं - नाशं जनयितुं, कश्चित् न अर्हति - कोऽपि न शक्नोति ।

**सारः** - येन आत्मतत्त्वेन दृश्यप्रपञ्चोऽयं व्याप्तः तत् आत्मतत्त्वं नाशरहितं (नित्यं) इति जानीयात् । नित्यं इममात्मानं नाशयितुं कोऽपि न शक्नोति च ।

**अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः ।**
**अनाशिनोऽप्रमेयस्य तस्माद् युध्यस्व भारत ॥**

**पदच्छेदः** -

नित्यस्य + उक्ताः - नित्यस्योक्ताः ।

अनाशिनः + अप्रमेयस्य - अनाशिनोऽप्रमेयस्य ।

**अन्वयः** - अनाशिनः अप्रमेयस्य नित्यस्य शरीरिणः इमे देहाः अन्तवन्तः (इति) उक्ताः । तस्मात् हे भारत ! त्वं युध्यस्व ।

**अर्थः** - अनाशिनः - नाशरहितस्य, अप्रमेयस्य - प्रत्यक्षादिप्रमाणैः अपरिच्छेद्यस्य, नित्यस्य - परिणामरहितस्य, शरीरिणः - आत्मनः, इमे देहाः - इमानि शरीराणि, अन्तवन्तः - नाशसहितानि, इति उक्ताः - इति विवेकिभिः उक्तानि । तस्माद् - यस्मात् नित्यः अविक्रियश्च आत्मा तस्माद् , हे भारत ! - हे अर्जुन ! त्वं युध्यस्व - त्वं युद्धात् उपरमं मा कार्षीः ।

**सारः** - नाशरहितस्य प्रत्यक्षादिप्रमाणाविषयस्य परिणामहीनस्य आत्मनः इमानि शरीराणि नाशसहितानि इति विवेकिभिः उक्तानि । तस्मात् हे भारत ! त्वं युद्धात् उपरमं मा कार्षीः इत्याशयः ।

**य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।**
**उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥**

**पदच्छेदः** -

यः + च + एनं - यश्चैनं ।

न + अयं - नायं ।

**अन्वयः** - यः एनं हन्तारं वेत्ति, यः च एनं हतं मन्यते तौ उभौ न विजानीतः अयं न हन्ति न हन्यते इति।

**अर्थः** - यः - यः पुरुषः, एनं - एनमात्मानं, हन्तारं - हननक्रियायाः कर्तारं, वेत्ति - जानाति, यः च - यः अन्यः पुरुषः, हतं - हननक्रियायाः कर्मरूपं, वेत्ति - विजानाति, तौ उभौ अपि न विजानीतः - न ज्ञातवन्तः, अयं - अयमात्मा, न हन्ति - हननक्रियायाः कर्ता न भवति, न हन्यते - हननक्रियायाः कर्म वा न भवति इति।

**सारः** - प्रकृतमात्मानं यः हननक्रियायाः कर्तृरूपेण यः कर्मरूपेण च वेत्ति तौ उभौ न विजानीनः आत्मा हननक्रियायाः कर्ता वा कर्म वा न भवतीति।

**न जायते म्रियते वा कदाचित् नायं भूत्वाऽभविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥**

**पदच्छेदः** -

न + अयं - नायं

भूत्वा + अभविता - भूत्वाऽभविता

शाश्वतः + अयं - शाश्वतोऽयं।

**अन्वयः** - अयं कदाचित् न जायते म्रियते वा। (अयं) भूत्वा अभविता भूयः अभूत्वा भविता न। अजः नित्यः शाश्वतः पुराणः अयं शरीरे हन्यमाने न हन्यते।

**अर्थः** - अयं - अयमात्मा, कदाचित् - कदापि, न जायते - न उत्पद्यते, म्रियते - विनश्यति वा, (अयमात्मा) भूत्वा - भवनक्रियामनुभूय, अभविता - अभावं गन्ता, भूयः - पुनः, अभूत्वा - भवनक्रियां अननुभूय, भविता - भावरूपतां प्राप्ता वा न। अजः - जन्मरहितः, शाश्वतः - सर्वदा एकरूपः, पुराणः - पुरापि नवः(वृद्धिरहितः) अयं - अयमात्मा, शरीरे हन्यमानेऽपि - शरीरे विपरिणम्यमानेऽपि, न हन्यते - न विपरिणम्यते।

**सारः** - अयमात्मा कदाचित् न जायते न वा म्रियते। अयमात्मा भूत्वा अभविता वा अभूत्वा भविता वा न। जन्मरहितः नित्यः सर्वदा एकरूपः वृद्धिरहितः अयमात्मा शरीरे विपरिणम्यमानेऽपि न विपरिणमते। श्लोकेन अनेन आत्मा षट्भावरहित इत्युच्यते।

**वेदविनाशिनं नित्यं य एनमजमव्ययम्।**

**कथं स पुरुषः पार्थ! कं घातयति हन्ति कम् ॥**

**पदच्छेदः** -

वेद + अविनाशिनं - वेदाविनाशिनम्।

एनं + अजं + अव्ययं - एनमजमव्ययम्।

**अन्वयः** - यः एनं अविनाशिनं नित्यं अजं अव्ययं च वेद, हे पार्थ ! सः पुरुषः कथं कं घातयति ? कं हन्ति ?

**अर्थः** - यः - यः पुरुषः, एनं - एनमात्मानं, अविनाशिनं - नाशरहितं, नित्यं - विपरिणामरहितं, अजं - जन्मरहितं, अव्ययं - अपक्षयरहितं, च वेद - जानाति, हे अर्जुन ! सः पुरुषः कथं घातयति - कथं हन्तारं प्रयोजयति (प्रेरयति) कं हन्ति - कथं हननक्रियां करोति ?

**सारः** - यः पुरुषः एनं पूर्वोक्तमात्मानं नाशरहितं, विपरिणामरहितं, जन्मरहितं, अपक्षयरहितं च जानाति सः पुरुषः कथं हननक्रियां करोति ? कथं हन्तारं प्रयोजयति ? सः न कथञ्चित् कञ्चित् हन्ति, न कथञ्चित् कञ्चित् घातयति इति उभयत्र आक्षेप एवार्थः।

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।**

**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥**

**पदच्छेदः** -

नरः + अपराणि - नरोऽपराणि।

जीर्णानि + अन्यानि - जीर्णान्यन्यानि।

**अन्वयः** - यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति।

**अर्थः** - यथा - यथा लोके, नरः - मनुष्यः, जीर्णानि - दुर्बलतां गतानि, वासांसि - वस्त्राणि, विहाय - परित्यज्य, अपराणि - अन्यानि, नवानि - नूतनानि वस्त्राणि, गृह्णाति - स्वीकरोति, तथा - तेनैव प्रकारेण, देही - आत्मा, जीर्णानि शरीराणि - दुर्बलतां गतानि शरीराणि, विहाय - त्यक्त्वा, अन्यानि नवानि - अपराणि नूतनानि शरीराणि, संयाति - संगच्छति (स्वीकरोति।

**सारः** - यथा लोके नरः जीर्णवस्त्राण्युपेक्ष्य नूतनानि अन्यानि वस्त्राणि स्वीकरोति तथा आत्मापि दुर्बलतां गतानि शरीराणि त्यक्त्वा अन्यानि नवानि शरीराणि आदत्ते।

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥**

**पदच्छेदः** -

न + एनं - नैनम्।

च + एनं - चैनम्।

क्लेदयन्ति + आपः - क्लेदयन्त्यापः।

**अन्वयः** - शस्त्राणि एनं न छिन्दन्ति, पावकः एनं न दहति, एनं आपः न क्लेदयन्ति, मारुतः न शोषयति च।

**अर्थः** - शस्त्राणि - अस्यादीनि आयुधानि, एनं - एनं आत्मानं, न छिन्दन्ति - न अवयवविश्लेषणं कुर्वन्ति। पावकः- अग्निः, एनं - आत्मानं, न दहति - न भस्मीकरोति, आपः - जलानि, न क्लेदयन्ति - न अवयवविश्लेषं कुर्वन्ति। मारुतः - वायुः, न शोषयति च - न स्नेहशोषणेन नाशयति च।

**सारः** - अस्यादीनि आयुधविशेषाणि एनमात्मानं न छिन्दन्ति। अग्निः आत्मानं न भस्मीकरोति। आपः आत्मानं न क्लेदयन्ति, वायुः स्नेहशोषणेन एनं न नाशयति च।

**अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।**
**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥**

**पदच्छेदः** -

अच्छेद्यः + अयं + अदाह्यः + अयं + अक्लेद्यः + अशोष्यः - अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्यः।

स्थाणुः + अचलः + अयं - स्थाणुरचलोऽयम्।

**अन्वयः** - अयं अच्छेद्यः, अयमदाह्यः, अयं अक्लेद्यः, अशोष्य एव। अयं नित्यः सर्वगतः स्थाणुः अचलः सनातनः च (भवति)।

**अर्थः** - अयं - अयमात्मा, अच्छेद्यः - छेत्तुमशक्यः, अदाह्यः - दाहयितुं असाध्यः, अक्लेद्यः - क्लेदयितुमशक्यः, अशोष्यः - शोषयितुमशक्यः, नित्यः - नाशरहितः, सर्वगतः - सर्वव्यापी, स्थाणुः - स्थाणुरिव स्थिरः, अचलः - चलनरहितः, सनातनः - सदा एकरूपः च भवति।

**सारः** - अयमात्मा अस्त्रादिभिः आयुधैः छेत्तुम् अग्निना दाहयितुम्, अद्भिः क्लेदयितुं, वायुना शोषयितुं वा न शक्यः । नित्यः सर्वगतः स्थाणुरिवास्थिरः, अचलश्चायमात्मा सदा एकरूपश्चेत्यर्थः।

**अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।**
**तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥**

**पदच्छेदः** -

अव्यक्तः + अयं + अचिन्त्यः + अयं + अविकार्यः + अयं + उच्यते - अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।

तस्मात् + एवं - तस्मादेवम्।

विदित्वा + एनं - विदित्वैनम्।

न + अनुशोचितुं + अर्हसि - नानुशोचितुमर्हसि।

**अन्वयः** -अयं अव्यक्तः, अयं अचिन्त्यः, अयं अविकार्यः च उच्यते। तस्माद् एवम् एनम् विदित्वा अनुशोचितुं न अर्हसि।

**अर्थः** - अयं - अयमात्मा, अव्यक्तः - सर्वेन्द्रियाविषयत्वात् अव्यक्तः, अचिन्त्यः - इन्द्रियागोचरत्वादेव अचिन्त्यः, अविकार्यः - परिणामरहितः, एवं - उक्तप्रकारेण, एनं - एनमात्मानं, विदित्वा - ज्ञात्वा, अनुशोचितुं - 'हन्त! अहमेषां, मया एते हन्यन्ते,' इत्येवं अनुशोचितुं - न अर्हसि त्वम्।

**सारः** - सर्वेन्द्रियगोचरत्वादयमात्मा अव्यक्तः अत एवाचिन्त्यः, तथा अविकार्यश्चेति जानीहि। एवमुक्तरीत्या एनमात्मानं ज्ञात्वा 'हन्त! अहमेषां, मया एते हन्यन्ते' इत्येवं रीत्या शोको न कर्तव्यः।

**अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।**
**तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥**

**पदच्छेदः** -

च + एनं - चैनम्।

न + एवं - नैवम् ।

शोचितुं + अर्हसि - शोचितुमर्हसि ।

**अन्वयः** - अथ च एनं नित्यजातं नित्यं मृतं वा मन्यसे तथापि हे महाबाहो ! त्वं एवं शोचितुं न अर्हसि ।

**अर्थः** - अथ च - यदि, एनं - एनमात्मानं, नित्यजातं - नित्यमपि लोकप्रसिद्ध्या जातमिति, नित्यं - नित्यमपि एनं, मृतं - मृतमिति मन्यसे, तथापि - तथाभावेऽपि, हे महाबाहो - हे अर्जुन, त्वम् एवं - 'जन्मवतो नाशः, नाशवतो जन्म चेति एतौ अवश्यंभाविनौ' इति ज्ञात्वा शोचितुं नार्हसि - त्वया शोको न कर्तव्यः ।

**सारः** - नित्यमपि एनमात्मानं यदि लोकप्रसिद्ध्या जात इति, नित्यमपि आत्मानं मृत इति च त्वं मन्यसे तथापि 'जन्मवतो नाशः नाशवतो जन्म चेति एतौ अवश्यंभाविनौ' इति ज्ञात्वा शोचितुं नार्हसि ।

**जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥**

**पदच्छेदः** -

तस्मात् + अपरिहार्ये + अर्थे - तस्मादपरिहार्येऽर्थे ।

शोचितुं + अर्हसि - शोचितुमर्हस ।

**अन्वयः** -हि जातस्य मृत्युः ध्रुवः,मृतस्य जन्म च ध्रुवम् । तस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ।

**अर्थः** - हि - यस्मात्, जातस्य - लब्धजन्मनः, मृत्युः - मरणं, ध्रुवः - निश्चितं (अव्यभिचारी) मृतस्य - नष्टप्राणस्य, जन्म - उत्पत्तिः, च ध्रुवं - निश्चिता । तस्मात् - जन्मवतो नाशः, नाशवतो जन्म च स्वाभाविकौ इत्यतः, अपरिहार्ये अर्थे - निवारयितुमशक्येऽस्मिन् विषये, त्वं शोचितुं न अर्हसि- त्वया शोको न कर्तव्यः ।

**सारः** - लब्धजन्मनः मरणं निश्चितं तथा मृतस्य जन्म च निश्चितम् । जन्मवतो नाशः नाशवतो जन्म च स्वाभाविकौ इत्यतः हे अर्जुन! अपरिहार्ये अस्मिन् विषये त्वया शोको न कर्तव्यः ।

**अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।**
**अव्यक्तनिधनान्येव तत्र का परिदेवना ॥**

**पदच्छेदः** -

अव्यक्तनिधनानि + एव - अव्यक्तनिधनान्येव ।

**अन्वयः** -हे भारत ! भूतानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि एव। तत्र परिदेवना का ?

**अर्थः** - हे भारत ! - हे अर्जुन !, भूतानि - शरीरादीनि, अव्यक्तादीनि - उत्पत्तेः प्राक् अव्यक्तरूपाणि, व्यक्तमध्यानि - उत्पत्तेरारभ्य मरणपर्यन्तं व्यक्तरूपाणि, अव्यक्तनिधनानि - नाशानन्तरं अव्यक्तरूपाणि भवन्ति। तत्र - विषयेऽस्मिन्, परिदेवना का - किमर्थोऽयं प्रलापः ?

**सारः** - हे अर्जुन ! कार्यकरणसङ्घातात्मकानि शरीराणि उत्पत्तेः प्राक् नाशानन्तरं च अव्यक्तरूपाणि भवन्ति। उत्पत्तेरारभ्य प्रलयपर्यन्तमेव तानि व्यक्तरूपाणि दृश्यन्ते । तस्मात् अदृष्टदृष्टप्रनष्टरूपाणि शरीराण्युद्दिश्य वृथा परिदेवना इति यावत्।

**आश्चर्यवत्पश्यति कश्चिदेनं आश्चर्यवद्वदति तथैव चान्यः ।**
**आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद नैव कश्चित्॥**

**पदच्छेदः** -

कश्चित् + एनं - कश्चिदेनम्।

आश्चर्यवत् + वदति - आश्चर्यवद्वदति

तथा + एव - तथैव

च + अन्यः - चान्यः

आश्चर्यवत् + च + एनं + अन्यः - आश्चर्यवच्चैनमन्यः

श्रुत्वा + अपि + एनं - श्रुत्वाप्येनं

च+ एव - चैव।

**अन्वयः** -एनं कश्चित् आश्चर्यवत् पश्यति, तथैव अन्यः आश्चर्यवत् वदति च, एनं अन्यः आश्चर्यवत् शृणोति च श्रुत्वा अपि एनं कश्चित् नैव वेद।

**अर्थः** - एनं - आत्मानं, कश्चित् आश्चर्यवत् - कश्चित् आश्चर्यमिव पश्यति, तथैव अन्यः - तद्वत् अन्यः कश्चित्, आश्चर्यवत् वदति च - व्यवहरति च। अन्यः - अन्यः कश्चित् आश्चर्यवत् शृणोति - आश्चर्यमिव शृणोति। श्रुत्वा अपि - श्रुत्वा दृष्ट्वा उक्त्वा अपि, एनं - एनं आत्मानं, कश्चित् न वेद - कश्चिदपि न जानाति।

**सारः** - एनमात्मानं आश्चर्यमिव दृष्ट्वा श्रुत्वा उक्त्वा अपि वस्तुतः कोऽपि आत्मतत्त्वं न जानाति। अतः आत्मा दुर्बोध इत्याशयः।

**देही नित्यमवध्योऽयं देहे सर्वस्य भारत।**

**तस्मात्सर्वापि भूतानि न त्वं शोचितुमर्हसि॥**

**पदच्छेदः** -

नित्यम् + अवध्यः + अयम् - नित्यमवध्योऽयम्।

तस्मात् + सर्वाणि - तस्मात्सर्वाणि।

शोचितुं + अर्हसि - शोचितुमर्हसि।

**अन्वयः** - हे भारत ! सर्वस्य देहे अयं देही नित्यं अवध्यः (भवति) तस्मात् त्वं सर्वाणि भूतानि (उद्दिश्य) शोचितुं न अर्हसि।

**अर्थः** - हे भारत ! - हे अर्जुन !, सर्वस्य - सर्वस्य प्राणिजातस्य, देहे - शरीरे, अयं देही - विद्यमानोऽयं आत्मा, नित्यं - सर्वदा, अवध्यः - न वध्यः भवति । तस्मात् त्वं, सर्वाणि भूतानि - सर्वाणि भूतानि उद्दिश्य, शोचितुं न अर्हति - शोको न कर्तव्यः।

**सारः** - हे अर्जुन ! सर्वस्य प्राणिजातस्य देहाभिमानी अयमात्मा सर्वदा अवध्यो भवति । तस्मात् भूतानि उद्दिश्य वृथा शोकः न कर्तव्यः इत्याशयः।

## पुनरावृत्तिः (Recap)

- असत्पदार्थः कदापि न भवति, यथा शशशृङ्गादिः ।
- सत्पदार्थः सर्वदा भवति, यथा आत्मा ।
- अविनाशिनः तत्त्वस्य विनाशं कर्तुं कोऽपि न शक्नोति ।
- आत्मा कञ्चित् न हन्ति, न वा केनापि हन्यते ।
- अयमात्मा सनातनः, जन्मरहितः, पुरातनः च ।
- आत्मा जीर्णानि शरीराणि परित्यज्य अभिनवानि अन्यानि शरीराणि आश्रयते ।
- अयमात्मा सर्वासु अपि अवस्थासु अवध्यः ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. आत्मतत्त्वेन किं व्याप्तः ?
2. तत् नाशरहितं इति विद्धि । तत् किम् ?
3. नित्यस्य शरीरिणः देहाः के उक्ताः ?
4. अयं न जायते म्रियते - अत्र अयं कः ?
5. नरः कानि विहाय अपराणि वस्त्राणि स्वीकरोति ?
6. ... आत्मानं न भस्मीकरोति । रिक्तं पूरयत।
7. जातस्य किं निश्चितम् ?
8. कानि उद्दिश्य वृथा शोकः कर्तव्यः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. नित्यम् आत्मानं नाशयितुं कोऽपि न शक्नोति । कुतः ?
2. एनमात्मानं विदित्वा अनुशोचितुं न अर्हसि - कस्मात् ?
3. कौ स्वाभाविकौ ?
4. आत्मा दुर्बोधः। कथं ?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

1. आत्मा हननक्रियायाः कर्ता वा कर्म न भवति - कस्मात् ?
2. आत्मा कीदृशः ?
3. जन्मवतो नाशः नाशवतो जन्म च अवश्यंभाविनौ - विशदयत ।

## निर्दिष्टाभ्यासः (Assignments)

1. आत्मनः षट्भावरहितत्वम् विशदयत ।
2. 'जन्मवतो नाशः नाशवतो जन्म चेति एतौ अवश्यंभाविनौ' - इति विषयमधिकृत्य स्पष्टयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. दृश्यप्रपञ्चः।
2. आत्मतत्त्वम्।
3. अन्तवन्तः।
4. आत्मा।
5. जीर्णानि वासांसि।
6. अग्निः।
7. मरणम्।
8. भूतानि।

## सूचनाग्रन्थाः (References)


1. Bhagavad Gita with commentary of Swami Chinmayananda (chinmaya Publications, Ernakulam)
2. Bhagavad Gita with Sivaravinda bhashya by Prof. G.Balakrishnan Nair, State Institute of Languages, Kerala, Thiruvananthapuram.
3. श्रीमद्भगवद्गीता, साधकसंजीवनी, गीताप्रेस्, गोरखपुर।
4. श्रीमद्भगवद्गीता, शाङ्करभाष्य हिन्दी अनुवाद सहित, अनुवादकः - श्रीहरिकृष्णदास् गोयन्दका।

# Unit - 4
## भर्तृहरेः नीतिशतकादुद्धृताः १५ श्लोकाः

### उद्देश्यानि (Learning Outcomes)

- भर्तृहरेः काव्यशैलीम् अवगन्तुं शक्नुयात्।
- विदुषः मूर्खस्य च भेदं ज्ञातुं शक्नुयात्।
- ज्ञानहीनस्य प्रतिकरणं कियत् कठिनं भवति इति भवन्तः ज्ञास्यन्ति।
- शिक्षायाः महत्त्वं ज्ञातुं समर्थः भविष्यति।
- सुन्दरवाक्यानां प्रभावं ज्ञातुं समर्थः भविष्यति।

### प्राग्व्यपेक्षाः (Prerequisites)

नीतिशतकम् इत्येषः भर्तृहरिणा रचितः ग्रन्थः। अस्मिन् १०० श्लोकाः विद्यन्ते। अयं कविः गृहस्थानां प्रापञ्चिकजनानां च प्रायोगिकमार्गप्रदर्शकः वर्तते। अस्मिन् विवेकः, हितचिन्तनं, ज्ञानसाधनं, शौर्यधैर्यविवरणं, शान्ततत्वं, सौशील्यं इत्यादिषु विषयेषु बोधनं दृश्यते ।अत्र बलवतः धनिकाञ्च उद्दिश्य विनयः दानशीलता च अभ्यसनीया इति सूच्यते। दुर्बलान् दरिद्रान् च उद्दिश्य वदति जीवने सरलता आत्मगौरवञ्च संपादनीयमिति। सर्वैः सह स्नेहभावेन व्यवहरणीयमिति उपदिशति। अन्येभ्यः सहाय्यकरणं, पीडितानां विषये अनुकम्पः, आत्मनिग्रहः, तत्त्वबद्धता, च अत्र बहुधा प्रतिपादितः अस्ति । संस्कृतवाङ्मये नीतिग्रन्थपरम्पराऽन्यकाव्यविधापरम्परेव नितरां प्राचीना। तस्यामेव परम्परायां भर्तृहरिप्रणीतनीतिशतकमतिहत्वमावहति।

नीतिशतकं नैतिकव्यावहारिकोपदेशानां भाण्डागारोऽस्ति। वस्तुतः तत् (नीतिशतकम्) दैनन्दिनजीवनोपयोगिनां सुभाषितानामप्यमूल्यो निधिः। नीतिशतके नैकनैतिकसिद्धान्तानां प्रतिपादनमस्ति, ये मानवजीवनस्य प्रतिक्षेत्रं महनीयसाहाय्यरूपां भूमिकां निर्वाहयन्ति। नीतिशतकगता उपदेशाः शाश्वताः सार्वजनीना जातिधर्मसम्प्रदायनिरपेक्षाश्च सन्ति। वस्तुतो जीवनस्याखिलाङ्गानि दृष्टिगतानि विधायैव तेषां रचना जाता। नीतिशतके व्यावहारिकजीवनोपयोगिन्यनेकविधानि सुभाषितानि नयनगोचरतां यान्ति। नीतिशतकस्य वर्णविषयाणां क्षेत्रमतिविशालमस्ति। तस्मिन्, मूर्खस्य विदुषः, दुर्जनस्य, सुजनस्य, दैवस्य, कर्मणः, शीलस्य, धनस्य, परोपकारस्य, विद्यायाः, सत्सङ्गेतश्चाटुकारित्वस्य च नितरामाह्लादजनकानि वर्णनानि समुपलभ्यते। अपरे विषया अपि तस्मिन् वर्ण्यतां याताः सन्ति। नीतिशतकं मुक्तककाव्यविधायां गण्यते, येषामनुशीलनेन

भर्तृहरेर्विविधविषयगतज्ञानस्यावबोधो जायते तथा कोऽपि तेषामध्यनेन स्वजीवने महत्सौविध्यं प्राप्तुं शक्नुयात्। कतिपयोदाहरणान्युद्धृत्य काव्यमिदं विस्तरशः प्रकाशयितुं काम्यते।

## मुख्यपदानि (Keywords)

अज्ञः, ज्ञानलवदुर्विदग्धं, व्याधिः, केयूराणि, प्रच्छन्नगुप्तं, जाड्यं, दिक्षुकीर्ति, सत्सङ्गतिः, आरम्भगुर्वी, दूरविलम्बिनः, पीयूषपूर्णाः।

## Discussion

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।**

**ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति।।**

**पदच्छेदः -**

सुखम् + आराध्यः - सुखमाराध्यः।

सुखतरम् + आराध्यते - सुखतरमाराध्यते।

ब्रह्मा + अपि - ब्रह्मापि।

**अन्वयः** - अज्ञः सुखम् आराध्यः, विशेषज्ञः सुखतरम् आराध्यते, ज्ञानलवदुर्विदग्धं तं नरं ब्रह्मा अपि न रञ्जयति।

**अर्थः** - अज्ञः - न जानातीत्यज्ञः, मूढ इत्यर्थः, सुखं - अनायासेन आराध्यः - प्रसादयितुं शक्यः। विशेषज्ञः - तत्वज्ञानी, सुखतरं - ततोऽप्यनायासेन (शीघ्रमेव) आराध्यते - प्रसादयितुं शक्यते। ज्ञानलवदुर्विदग्धं तं नरं - लेशमात्रेण ज्ञानेन पण्डितं मान्यं नरं (मूर्खजनम्) ब्रह्मापि - जगत्स्रष्टापि, न रञ्जयति - प्रसादयितुं न शक्नोति।

**सारः** - यः किमपि न जानाति सः सुखेन प्रसादयितुं शक्यः। यस्तु तत्त्वज्ञानी सः अल्पज्ञानिनमपेक्ष्य शीघ्रं प्रसादयितुं शक्यः। किन्तु अल्पज्ञानेन पण्डितं मन्यं नरं ब्रह्मा अपि प्रसादयितुं न शक्नोति।

**शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो**

**नागेन्द्रो निशिताङ्कुशेन समदौ दण्डेन गोगर्दभौ।**

**व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं**

**सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।।**

**पदच्छेदः -**

व्याधिः + भेषजसंग्रहैः + च - व्याधिर्भेषजसंग्रहैश्च।

विविधैः + मन्त्रप्रयोगैः + विषम् - विविधैर्मन्त्रप्रयोगैर्विषम्।

सर्वस्य + औषधम् + अस्ति - सर्वस्यौषधमस्ति।

नास्ति + औषधम् - नास्त्यौषधम्।

**अन्वयः** - हुतभुक् जलेन वारयितुं, शक्यः, सूर्यातपः छत्रेण (वारयितुं शक्यः) नागेन्द्रः निशिताङ्कुशेन (वारयितुं शक्यः) समदौ गोगर्दभौ दण्डेन (वारयितुं शक्यौ)। व्याधिः भेषजसंग्रहैः, विषं विविधैः मन्त्रप्रयोगैः च (वारयितुं शक्यं) (एवं) सर्वस्य शास्त्रविहितं औषधं अस्ति। (किन्तु) मूर्खस्य औषधं नास्ति।

**अर्थः** - हुतभुक् - अग्निः (हुतं भुङ्क्ते इति हुतभुक्), जलेन वारयितुं शक्यः - जलेन शमयितुं शक्यः, सूर्यातपः - सूर्यप्रकाशः, छत्रेण - आतपत्रेण, वारयितुं शक्यः। नागेन्द्रः - गजराजः, निशिताङ्कुशेन - तीक्ष्णेन अङ्कुशेन, समदौ - मदेन सह वर्तमानौ, गोगर्दभौ - गौः गर्दभश्च, दण्डेन - यष्ट्या, व्याधिः - रोगः, भेषजसंग्रहैः - औषधप्रयोगैः, विषं - गरलं, विविधैः - नानाप्रकारैः, मन्त्रप्रयोगैः - सर्पाद्यवराधकानां मन्त्राणां प्रयोगैः(शमयितुं शक्यम्)। एवं सर्वस्य, शास्त्रविहितं - शास्त्रप्रोक्तं, औषधं अस्ति - उपयोगोऽस्ति। मूर्खस्य - मूढस्य, औषधं, क्वापि - कुत्रापि, न श्रूयते।

**सारः** - लोके अग्निः जलेन तथा सूर्यप्रकाशः छत्रेण शमयितुं शक्यते। गजराजः अङ्कुशेन तथा वृषभरासभौ दण्डेन च नियम्यन्ते। औषधप्रयोगेण व्याधेः तथा मन्त्रप्रयोगेण विषस्य इत्येवं सर्वेषां शास्त्रप्रोक्तमौषधमस्ति। किन्तु मूर्खस्य औषधं कुत्रापि न श्रूयते।

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।**

**ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ।।**

**पदच्छेदः -**

मृगाः + चरन्ति - मृगाश्चरन्ति।

**अन्वयः** - येषां न विद्या, न तपः, न दानं, न ज्ञानं, न शीलं,न गुणः,न धर्मः ते भुवि मर्त्यलोके भारभूताः मनुष्यरूपेण मृगाः चरन्ति।

**अर्थः** - येषां - येषां जनानां, न विद्या - न ज्ञानं, न तपः - धर्मकार्येषु न कष्टसहनं, न दानं- न साहाय्यकरणं, न ज्ञानं - न विवेकबुद्धिः, न शीलं - न सद्वृत्तं, न धर्मः - न कर्तव्यपालनं, ते भुवि - पृथिव्यां, मर्त्यलोके - मनुष्याणां लोके, भारभूताः - भाररूपाः (सन्तः) मनुष्यरूपेण - मनुष्याणां आकारेण, मृगाः - पशवः इव, चरन्ति - कालं यापयन्ति।

**सारः -** ये जनाः विद्यया तपसा दानेन ज्ञानेन सद्वृत्तेन गुणैः धर्मेण च विहीनाः सन्ति ते अनित्येऽस्मिन् लोके भारभूताः सन्ति। ते यद्यपि मनुष्यरूपधारिणः तथापि पशवः एव। तेषां जन्म लोके निरर्थकमिति यावत्।

**केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वला**
**न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।**

**पदच्छेदः -**

न + अलङ्कृता - नालङ्कृता।

वाणी + एका - वाण्येका।

**अन्वयः** - केयूराणि पुरुषं न भूषयन्ति, चन्द्रोज्वलाः हाराः न, स्नानं न, विलेपनं न, कुसुमं न, अलङ्कृताः मूर्धजाः वा पुरुषं न भूषयन्ति। या संस्कृता धार्यते सा एका वाणी पुरुषं समलङ्करोति। भूषणानि क्षीयन्ते, वाग्भूषणं सततं भूषणं खलु।

**अर्थः** - केयूराणि - आभरणानि, पुरुषं - जनं, न भूषयन्ति - न अलङ्कुर्वन्ति। चन्द्रोज्वलाः हाराः - चन्द्र इव उज्वलाः (विमलाः) हाराः, विलेपनं - अङ्गरञ्जनं, अलंकृताः मूर्धजाः - पुष्पमाल्यादिना अलङ्कृताः केशाः, या संस्कृता - या संस्कृताख्या, धार्यते - ज्ञायते, सा एका वाणी - देवभाषा, पुरुषं समलङ्करोति - पुरुषं भूषयति। भूषणानि क्षीयन्ते - केयूरादीनि भूषणानि कालक्रमेण नश्यन्ति। वाग्भूषणं - संस्कृतवाग्रूपं भूषणं, सततं भूषणं - नित्यं भूषणं भवति।

**सारः** - पुरुषं केयूरादीनि आभरणानि वा चन्द्र इव उज्ज्वलाः हाराः वा स्नानविलेपनकुसुमादीनि वा न अलम्कुर्वन्ति । किन्तु संस्कृताख्या देववाणी एव पुरुषं भूषयति । लौकिकानि भूषणानि केवलं अनित्यानि भवन्ति। वाग्रूपं भूषणमेव पुरुषस्य नित्यं भूषणं भवति।

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**

**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।**

**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं**

**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ।।**

**पदच्छेदः -**

रूपं + अधिकं - रूपमधिकं।

**अन्वयः** - विद्या नाम नरस्य अधिकं रूपम् । विद्या प्रच्छन्नगुप्तं धनम् । विद्याभोगकरी यश:सुखकरी च भवति। गुरूणां गुरुः विद्या विदेशगमने बन्धुजनः । विद्या परं दैवतम्। विद्या राजसु पूज्यते, न हि धनम्। विद्याविहीनः पशुः ।

**अर्थः** - विद्यां प्रशंसति अत्र - विद्या - ज्ञानं, नरस्य - मनुष्यस्य, अधिकं रूपं - वरतरं रूपम् । विद्या प्रच्छन्नगुप्तं - हृदयरूपायां अतिगुप्तं धनम्। भोगकरी - भोगान् (सांसारिकसुखानि) उत्पादयति। यशःसुखकरी - कीर्तिं सुखं च जनयति, विदेशगमने बन्धुजनः - विदेशगमने बन्धुवत् सहायिका, विद्या परं दैवतं - विद्या परा देवता,

राजसु पूज्यते - राज्ञां मध्ये विद्यैव पूज्यते, न हि धनं पूज्यते। विद्याविहीनः पशुः - विद्याविहीनः जनः मृगतुल्यः।

**सारः** - मनुष्यस्य एकं महनीयं रूपं भवति ज्ञानम् । हृदयगुहायां गुप्तं धनं भवति विद्या। भोगान् यशः सुखं च संपादयति। गुरूणामपि गुरुः विद्या विदेशगमने सहायिका भवति। यस्मात् विद्यैव पूज्यते तस्मात् विद्याविहीनः पशुसमानो भवति।

**जाड्यं धियो हरति, सिञ्चति वाचि सत्यं**

**मानोन्नतिं दिशति पापमपकरोति।**

**चेतः प्रसादयति, दिक्षु तनोति कीर्तिं**

**सत्सङ्गतिः कथय किं न करोति पुंसाम्।।**

**पदच्छेदः -**

धियः + हरति - धियो हरति।

पापं + अपाकरोति - पापमपाकरोति।

**अन्वयः** - सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापं अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति। कथय सत्सङ्गतिः पुंसां किं न करोति ?

**अर्थः** - सत्सङ्गतिः - सद्भिः (श्रेष्ठैः) संपर्कः, धियः - बुद्धेः, जाड्यं - जडतां, हरति - निवारयति, वाचि - वाण्यां, सत्यं - याथार्थ्यं, सिञ्चति - वर्षति, मानोन्नतिं - बहुमानातिशयं, दिशति - प्रयच्छति, पापं अपाकरोति - पापं दूरीकरोति, चेतः - चित्तं, प्रसादयति - प्रहर्षयति, दिक्षु कीर्तिं तनोति - सर्वेषु देशेषु यशः प्रसारयति । कथय - वद, सत्सङ्गतिः पुंसां किं न करोति - पुरुषाणां सकलमपि संपादयति।

**सारः** - सज्जनसम्पर्कः पुंसां बुद्धेः मान्द्यं दूरीकरोति, वचनेषु सत्यं वर्षयति, बहुमानातिशयं प्रयच्छति, किल्बिषं नाशयति, चित्तं प्रहर्षयति, सर्वेषु देशेषु यशः प्रसारयति। एवं सज्जनसंपर्कः पुंसां सत्फलानि संपादयति।

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**

**प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**

**विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः**

**प्रारब्धमुत्तमजनाः न परित्यजन्ति।।**

**पदच्छेदः -**

प्रारब्धं + उत्तमजनाः - प्रारब्धमुत्तमजनाः।

**अन्वयः** - नीचैः विघ्नभयेन न खलु प्रारभ्यते। मध्याः प्रारभ्य विघ्नविहिताः विरमन्ति। उत्तमजनाः विघ्नैः पुनः पुनः प्रतिहन्यमानाः अपि प्रारब्धं न परित्यजन्ति।

**अर्थः** - नीचैः - अधमैः, विघ्नभयेन - अन्तरायभीत्या, मध्याः - मध्यमाः, प्रारभ्य - कार्याणि उपक्रम्य, विघ्नविहिताः - विघ्नैः ताडिताः, विरमन्ति - निवर्तन्ते, उत्तमजनाः -श्रेष्ठाः, विघ्नैः प्रतिहन्यमानाः - विघ्नैः ताड्यमानाः अपि, प्रारब्धं - उपक्रान्तं कार्यं, न परित्यजन्ति।

**सारः** - अधमाः विघ्नशङ्कया कार्याणि नारभन्ते। मध्यमाः विघ्ने जाते ततो निवर्तन्ते। उत्तमाः विघ्नैः पुनः पुनः प्रतिहन्यमानेऽपि उपक्रान्तं न परित्यजन्ति।

**यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।**

**स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति।।**

**पदच्छेदः -**

यस्य + अस्ति - यस्यास्ति

काञ्चनम् + आश्रयन्ति - काञ्चनमाश्रयन्ति।

**अन्वयः** - यस्य वित्तमस्ति सः नरः कुलीनः, सः पण्डितः, सः श्रुतवान्, गुणज्ञः, स एव वक्ता, स च दर्शनीयः, सर्वे गुणाः काञ्चनम् आश्रयन्ति।

**अर्थः** - यस्य - यस्य सविधे, वित्तमस्ति - धनमस्ति, स नरः - सः नरः, कुलीनः - कुलप्रसूतः, सः पण्डितः - सः विद्वान्, श्रुतवान् - बहुश्रुतः, गुणज्ञः - गुणग्राही, स एव वक्ता - स एव व्याख्याता, स च दर्शनीयः - स च रमणीयाकृतिः। (यतः - यस्मात्) सर्वे गुणाः, काञ्चनं - कनकं, आश्रयन्ति - अवलम्बन्ते।

**सारः** - यस्य सविधे धनमस्ति स एव नरः कुलप्रसूतः, विद्वान्, बहुश्रुतः, गुणग्राही, व्याख्याता, रमणीयाकृतिः च भवति। यस्मात् सर्वे गुणाः धनमाश्रयन्ति इति यावत्।

**दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन् ।**

**मणिना भूषतः सर्पः किमसौ न भयङ्करः।।**

**पदच्छेदः -**

भूषितः + अपि - भूषितोऽपि।

किं + असौ - किमसौ।

**अन्वयः** - विद्यया भूषितः सन् अपि दुर्जनः परिहर्तव्यः। मणिना भूषितः असौ सर्पः किं भयङ्करः न ?

**अर्थः** - विद्यया - शास्त्रज्ञानेन, भूषितः सन् - मण्डितः सन्नपि, दुर्जनः - दुष्टःजनः, परिहर्तव्यः - दूरीकर्तव्यः । मणिना - रत्नेन, भूषितः - समुद्भासितः(सन्नपि) असौ सर्पः - अयं सर्पः, किं भयङ्करो न - भयङ्कर एव।

**सारः** - सर्वशास्त्रविचक्षणोऽपि दुर्जनश्चेत् सः दूरतः परिहर्तव्यः। कुत इत्याह फलकस्थितेन माणिक्येन अलंकृतोऽपि सर्पः सर्वेषां भयङ्कर एव।

**आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।**

**दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम्।।**

**पदच्छेदः -**

छाया + इव - छायेव।

**अन्वयः** - खलसज्जनानां मैत्री दिनस्य पूर्वार्धपरार्धभिन्ना छाया इव आरम्भगुर्वी क्रमेण क्षयिणी पुरा लध्वी पश्चात् च वृद्धिमती (भवति)।

**अर्थः** - खलसज्जनानां - दुष्टानां शिष्टानां च, मैत्री - सख्यं, दिनस्य - दिवसस्य, पूर्वार्षपरार्धभिन्ना - पूर्वार्धभागेन परार्धभागेन विभक्ता, छाया इव - प्रतिबिम्ब इव, आरम्भगुर्वी - प्रभाते वृद्धिमावहन्ती, क्रमेण क्षयिणी - उत्तरोत्तरं नश्यन्ती, पुरा - पूर्वं, लध्वी - ह्रस्वा, पश्चात् च - अनन्तरं तु, वृद्धिमती - प्रवर्धमाना (भवति)

सारः - दुर्जनमैत्री पूर्वाह्णछाया इव प्रारम्भे वृद्धिमावहन्ती क्रमेण उत्तरोत्तरं नश्यन्ती च भवति। सज्जनैः सह मैत्री तावत् अपराह्णच्छाया इव प्रारम्भे लध्वी ततः प्रवर्धमाना इव भवति।

**विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।**

**यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्।।**

**पदच्छेदः -**

धैर्यं + अथ + अभ्युदये - धैर्यमथाभ्युदये।

च + अभिरुचिः + व्यसनम् - चाभिरुचिर्व्यसनम्।

प्रकृतिसिद्धं + इदं - प्रकृतिसिद्धमिदं।

**अन्वयः** - विपदि धैर्यं, अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि च अभिरुचिः, श्रुतौ व्यसनं, इदं महात्मनां प्रकृतिसिद्धं हि।

**अर्थः** - विपदि - आपदि, धैर्यं - धीरता, अथ - अनन्तरं, अभ्युदये - सम्पत्तौ, क्षमा - सहिष्णुता, सदसि - सभायां, वाक्पटुता - भाषणचातुरी, युधि - युद्धे, विक्रमः - शौर्यप्रदर्शनं, यशसि - कीर्तौ, अभिरुचिः - तात्पर्यं, श्रुतौ - वेदे (शास्त्रेषु) व्यसनं - अभिलाषः, इदं - अयं स्वभावविशेषः, महात्मनां, प्रकृतिसिद्धं हि - स्वभावेन सिद्धमेव।

**सारः** - महात्मनां स्वाभाविकोऽयं स्वभावः यत् आपत्काले धैर्यं, सम्पत्तौ सहिष्णुता, विद्वत्सभायां संभाषणचातुरी, युद्धे शौर्यप्रदर्शनं यशोभिवृद्धये निरन्तरं प्रयत्नः, वेदशास्त्राद्यभ्यसने सततं तात्पर्यं च।

**भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः।**

**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।**

**पदच्छेदः -**

नम्राः + तरवः - नम्रास्तरवः।

फलोद्गमैः + नवाम्बुभिः + दूरविलम्बिनः - फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनः।

एव + एष - एवैष।

**अन्वयः** - तरवः फलोद्गमैः नम्राः भवन्ति, घनाः नवाम्बुभिः दूरविलंबिनः, सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति)। एष परोपकरिणां स्वभाव एव।

**अर्थः** - तरवः - वृक्षाः, फलोद्गमैः - फलानां भारेण, नम्राः - अवनताः, भवन्ति। घनाः - मेघाः, नवाम्बुभिः - जलबिन्दुभिः, दूरविलंबिनः - अधः लम्बायमानाः (भवन्ति)। सत्पुरुषाः - सज्जनाः, समृद्धिभिः - ऐश्वरैः, अनुद्धताः - विनम्राः भवन्ति। एष - अयं, परोपकारिणां स्वभावः - प्रकृतिः।

**सारः** - फलागमेन नम्राः भवन्ति वृक्षाः, नूतनजलभारेण अधः लम्बायमानाः भवन्ति मेघाः। सज्जनाः अभ्युन्नतौ नम्रशिरस्काः भवन्ति। एते स्वभावविशेषाः परोपकारिषु लोके दृश्यन्ते।

**पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान्प्रकटीकरोति।**

**आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।**

**पदच्छेदः -**

पापात् + निवारयति - पापान्निवारयति।

सन्मित्रलक्षणं + इदम् - सन्मित्रलक्षणमिदम्।

**अन्वयः** - पापात् निवारयति, हिताय योजयते, गुह्यं निगूहति, गुणान् प्रकटीकरोति, आपद्गतं च न जहाति, काले ददति । इदं सन्मित्रलक्षणमिति सन्तः प्रवदन्ति ।

**अर्थः** - पापात् - पापकर्मणः, निवरायति - निरुणद्धि, हिताय - कल्याणाय, योजयते - नियुङ्क्ते, गुह्यं - गोपनीयं, निगूहति - निशेषेण गोपयति, गुणान् - कीर्तिजनकान् सद्भावान्, प्रकटीकरोति - जनसविधे वर्णयति, आपद्गतं - प्राप्तदुःखं, न जहाति - न परित्यजति, काले - अनुकूले समये, ददाति- धनसाहाय्यं करोति , इदं - पूर्वोक्तं, सन्मित्राणां लक्षणमिति वदन्ति।

**सारः** - यः हानिकारात् कर्मणो निवार्य श्रेयस्करे कर्मणि प्रवर्तयति, गोपनीयं दुर्वृत्तं संगोप्य सद्गुणान् जनसविधे वर्णयति, प्राप्तदुःखं अपरित्यज्य तस्य साहाय्यं करोति, व्यसनसमये उचितं साहाय्यं करोति सः सन्मित्रपदवाच्यः ।

**मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**

**परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।**

**पदच्छेदः -**

पुण्यपीयूषपूर्णाः + त्रिभुवनं + उपकारश्रेणिभिः - पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः।

**अन्वयः** - मनसि वचसि काये पुण्यपीयूषपूर्णाः उपकारश्रेणिभिः त्रिभुवनं प्रीणयन्तः परगुणपरमाणून् पर्वतीकृत्य निजहृदि नित्यं विकसन्तः सन्तः कियन्तः सन्ति।

**अर्थः** - मनसि - हृदये, वचसि - वाण्यां, काये - शरीरे च, पुण्यपीयूषपूर्णाः- पुण्यरूपेण अमृतेन पूर्णाः (कायवाङ्मनोभिः पुण्यमेव कुर्वन्तः), उपकारश्रेणिभिः - उपकारसमूहैः, त्रिभुवनं प्रीणयन्तः - भुवनत्रयं प्रसादयन्तः, परगुणपरमाणून् - अत्यल्पानपि परमाणून्, पर्वतीकृत्य - महत्तरान् कृत्वा, निजहृदि - स्वकीये मनसि, नित्यं विकसन्तः - सदा सन्तुष्यन्तः, सन्तः - सत्पुरुषाः, कियन्तः - कियत्संख्याकाः (विरलाः) सन्ति।

**सारः** - मनसा वाचा कर्मणा च त्रैलोक्यवर्तिनां प्राणिनां उपकारमेव कुर्वन्तः उपकारैः भुवनत्रयमपि प्रीणयन्तः, परेषां अत्यल्पगुणानपि पर्वतीकृत्य हृदि धारयन्तः सज्जनाः जगति विरला एव सन्ति।

**निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु, युगान्तरे वा, न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।।**

**पदच्छेदः -**

अद्य + एव - अद्यैव।

मरणं + अस्तु - मरणमस्तु।

न्यायात् + पथः - न्याय्यात्पथः।

**अन्वयः** - नीतिनिपुणाः निन्दन्तु, यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु यथेष्टं वा गच्छतु, मरणम् अद्यैव वा युगान्तरे वा अस्तु। धीराः न्यायात् पथः पदं न प्रविचलन्ति।

**अर्थः** - नीतिनिपुणाः - नीतिशास्त्रे विशारदाः, निन्दन्तु - नायं कार्याकार्यकुशल इति वदन्तु, यदि वा स्तुवन्तु - यदि वा प्रशंसन्तु, लक्ष्मीः - वित्तं, समाविशतु - प्राप्नोतु, यथेष्टं वा गच्छतु, मरणं - मृत्युः, अद्यैव वा अस्तु - इदानीमेव भवतु, युगान्तरे वा - कालान्तरे वा, धीराः न्यायात् पथः - धैर्यशालिनः न्यायोचितात् मार्गात्, पदं न प्रविचलन्ति - न भ्रंशन्ति।

**सारः** - नीतिशास्त्रविशारदाः निन्दन्तु प्रशंसन्तु वा, लक्ष्मीः आगच्छतु गच्छतु, मृत्युः सम्प्रति वा आगामिनि युगे वा भवतु, धीराः न्यायोचितात् मार्गात् न प्रविचलन्ति।

## पुनरावृत्तिः (Recap)

- मूर्खस्य मौढ्यं दूरीकर्तुं न शक्यते।
- मनुष्यरूपधारिणः पशवः एव, विद्यादिहीनाः नराः।
- विद्यारूपस्य (वाणीरूपस्य) आभूषणस्य यथार्थतां साधयति।
- विद्याविहीनः पशुः इति प्रतिपादयति।

- सत्सङ्गस्य महत्त्वमङ्गीकरोति।
- विभूषणं मौनम् अपण्डितानाम्।
- सर्वगुणानां मूलं धनमस्ति।
- क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।
- न्यायात् पथः प्रविचलन्ति पदं न धीराः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. ब्रह्मापि तं नरं न सञ्जयति - कं नरम्?
2. केन रचितः ग्रन्थः भवति नीतिशतकम् ?
3. अज्ञः किं आराध्यः ?
4. विशेषज्ञः किं आराध्यते ?
5. सूर्यप्रकाशः केन शमयितुं शक्यते ?
6. का पुरुषं भूषयति ?
7. प्रच्छन्नगुप्तं धनं किम् ?
8. यस्य सविधे धनमस्ति सः कः ?
9. सर्वे गुणाः किमाश्रयन्ति ?
10. के समृद्धिभिः अनुद्धताः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. पुरुषस्य नित्यं भूषणं किं भवति ?
2. ते भुवि मर्त्यलोके भारभूताः मनुष्यरूपेण मृगाः चरन्ति। के ?
3. विद्याविहीनः पशुसमानो भवति । कस्मात् ?
4. एते स्वभावविशेषाः परोपकारिषु लोके दृश्यन्ते। के ?
5. धीराः न्याय्यात् मार्गात् न प्रविचलन्ति। कस्मात् ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. संस्कृतवाङ्मये सत्सङ्गस्य महत्वं कथम् अङ्गीकृतम् ?
2. विद्यायाः प्रशंसनमधिकृत्य लिखत।
3. महात्मनां स्वाभाविकः स्वभावाः के ?
4. परोपकारिणां स्वभावाः के ?

## निर्दिष्टाभ्यासः (Assignments)

1. नीतिशतकमधिकृत्य प्रबन्धं आरचयत।
2. सन्मित्रस्य, परोपकारिणः च स्वभावानधिकृत्य लिखत।
3. भर्तृहरेः योगदानम् अधिकृत्य उपन्यस्यत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. अल्पज्ञानेन पण्डितं मन्यं जनम्।
2. भर्तृहरिणा।
3. सुखम्।
4. सुखतरम्।
5. छत्रेण।
6. संस्कृताख्या देववाणी एव।
7. विद्या।
8. सः कुलीनः सुन्दरश्च।
9. धनं(काञ्चनं)।
10. सत्पुरुषाः।

## सूचनाग्रन्थाः (References)


1. नीतिशतकं - भर्तृहरिः, चौखंबा संस्कृतसीरीस् आफिस्, वाराणसी।
2. भर्तृहरिशतकत्रयं, संपादकः - पु.गोपीनाथ, राष्ट्रीयसंस्कृत संस्थान, नई दिल्ली, २०१०।
3. संस्कृतनिबन्धमञ्जूषा, डा. उदयशंकर झा, चौखम्बा सुरभारती प्रकाशन, २०१३

BLOCK-2

# मनुस्मृतिः (१५ श्लोकाः), याज्ञवल्क्यस्मृतिश्च (१० श्लोकाः)

SGOU

# Unit - 1
## मनुस्मृतेः अधोनिर्दिष्टाः ८ श्लोकाः

### उद्देश्यानि (Learning Outcomes)

- धर्मशब्दस्य निर्वचनं कर्तुं प्रभवन्ति।
- धर्मशास्त्रदृष्ट्या धर्मलक्षणं ज्ञातुं शक्नुवन्ति।
- धर्मनियमानां स्वरूपावबोधनम्।
- भारतीयसंस्कृतिं निर्धारयति।

### प्राग्व्यपेक्षाः (Prerequisites)

मानवस्य सार्थक्यसंपादनसाधनं धर्मः। धर्मबोधकं शास्त्रं धर्मशास्त्रम्। धर्मशास्त्रं इत्युक्तौ स्मृतिः। स्मृत्यर्थ एव अविशेषेण धर्मशास्त्रम्। स्मृतिस्तु श्रुतिबोधितस्य धर्मस्य विवरणरूपा। ते च धर्मशास्त्ररूपाः स्मृतिग्रन्थाः अनेके सन्ति। तेषु एकः मनुस्मृतिः। मनुस्मृतिग्रन्थस्य रचनाकारः आचार्यः मनुः वर्तते। स्मृतिकारेषु मनोः स्थानं सर्वोत्तमं वर्तते। अस्मिन् ग्रन्थे सर्वे धर्माः आहार-व्यवहार-प्रायश्चित्तानि इति त्रिषु विभागेषु, विभज्य काव्यरूपेण वर्णिताः सन्ति। तत्र स्मृति-प्रामाण्यात् श्रुति-प्रामाण्यं श्रेष्ठम् इति प्रतिपादितमस्ति। आचार्यमनुः भारतवर्षस्य सर्वप्रधानो धर्मनियामकः। इदं शास्त्रं न केवलं भारतवर्षे मान्यम्, अपि तु श्याम- कम्बोज-फिलीपाइन- जावा-वाली-सुमात्रादि-स्थानेषु सम्प्रत्यपि मनुस्मृतिसम्मताः धर्मनियमाः स्वीकृताः दृश्यन्ते। अस्मिन् ग्रन्थे वर्णानां चतुर्णाम् आश्रमाणाञ्च धर्माः कर्तव्यक्रमाः व्यवहारनियमाः राजनीतिक व्यवस्था दण्डविधानानि पापानि प्रायश्चित्तानि च समुपलभ्यन्ते।

मनुस्मृतेः प्रथमाध्याये सृष्टिक्रमस्य निरूपणं दरीदृश्यते। तत्र स्वर्णमयाण्डे ब्रह्मणः उत्पत्तिः, देवस्य मानसिककालस्य निर्णयः, वर्णानां धर्माः आश्रमनियमानां वर्णनं च कृतमस्ति। यक्ष-रक्षपिशाचादीनां सृष्टिः, पशु-मृग-मनुष्यादिसृष्टिः, वर्ष-मास-पक्ष-होरादिनिरूपणम्, चतुर्युगनिरूपणं, चतुर्वर्णानां गुणानुगुणं कर्मणां व्यवस्थादीनां जाति-कुलधर्मादीनाञ्च निरूपणं कृतमस्ति।

## मुख्यपदानि (Keywords)

उपाध्यायान्, सहस्रं, गौरवेण, स्वस्रा, दुहित्रा, इन्द्रियग्रामः,क्लेशं,निष्कृतिः,अधोगतिम्, जामयः, ध्रुवम्।

## Discussion

**उपाध्यायान् दशाचार्यः आचार्याणां शतं पिता।**
**सहस्रन्तु पितृन्माता गौरवेणातिरिच्यते॥ (2/145)**

**पदच्छेदः** -

दश + आचार्यः - दशाचार्यः।

गौरवेण + अतिरिच्यते - गौरवेणातिरिच्यते।

**अन्वयः** -दश उपाध्यायान् (अपेक्ष्य) आचार्यः, आचार्याणां शतं अपेक्ष्य पिता, सहस्रं पितृन् (अपेक्ष्य) माता गौरवेण अतिरिच्यते ।

**अर्थः** - गौरवेण - महत्वविषये, उपाध्यायः - अध्यापकः।

**सारः -** महत्त्वविषये दशसंख्याकान् उपाध्यायान् अपेक्ष्य आचार्यः, शतसंख्याकान् आचार्यान् अपेक्ष्य पिता, सहस्रसंख्याकान् पितृन् अपेक्ष्य माता च व्यतिरिच्यते।

**मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्।**
**बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥ (2/215)**

**पदच्छेदः** -

विविक्तासनः + भवेत् - विविक्तासनो भवेत्।

विद्वांसं + अपि - विद्वांसमपि।

**अन्वयः** - मात्रा स्वस्रा दुहित्रा वा (सह) विविक्तासनः न भवेत्। बलवान् इन्द्रियग्रामः विद्वांसमपि कर्षति।

**अर्थः** - मात्रा - जनन्या सह, स्वस्रा - सोदर्या सह, दुहित्रा - पुत्र्या सह, विविक्तासनः - विविक्तं (विजनदेशे) आसनं यस्य तादृशः। इन्द्रियग्रामः - इन्द्रियसमूहः (इन्द्रियाणि) कर्षति - आकर्षति।

**सारः -** विद्वानपि स्वजनन्या, सोदर्या, पुत्र्या वा सह विजनदेशे न वसेत् । कुत इति चेत् - प्रबलानि इन्द्रियाणि पण्डितमपि आकर्षति।

**यं मातापितरौ क्लेशं सहेते संभवे नृणाम्।**
**न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि॥ (2/227)**

**पदच्छेदः** -

वर्षशतैः + अपि - वर्षशतैरपि।

**अन्वयः** - नृणां संभवे मातापितरौ यं क्लेशं सहेते तस्य निष्कृतिः कर्तुं वर्षशतैः अपि न शक्या।

**अर्थः** - नृणां - मनुष्याणां, संभवे - उत्पत्तौ, यं क्लेशं - यत् दुःखं, सहेते - अनुभवतः(मातापितरौ) तस्य निष्कृतिः - तस्य निर्यातनं, वर्षशतैरपि - अनेकैः वर्षैरपि, न शक्या - न शक्यते।

**सारः -** मनुष्याणां जन्मसमये ततः पश्चात् च मातापितरौ यत् दुःखमनुभवतः तस्य निर्यातनं कर्तुं वर्षशतैरपि न शक्यते।

**शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्।**
**जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते॥ (3/17)**

**पदच्छेदः** -

याति + अधोगतिम् - यात्यधोगतिम्।

**अन्वयः** - शूद्रां शयनमारोप्य ब्राह्मणः अधोगतिं याति। तस्यां सुतं जनयित्वा (सः) ब्राह्मण्यादेव हीयते।

**अर्थः** - शूद्रां - शूद्रस्त्रीं, शयनमारोप्य - शयनं कुर्वन्, ब्राह्मणः - विप्रः, अधोगतिं - नरकं, याति - गच्छति। तस्यां - शूद्रस्त्रियां, सुतं - पुत्रं, जनयित्वा - उत्पाद्य, ब्राह्मण्यादेव - ब्राह्मणत्वादेव, हीयेत - भ्रष्टो भवति।

**सारः -** शूद्रस्त्रिया सह शयनं कुर्वन् ब्राह्मणः अधोगतिं गच्छति। तस्यां पुत्रं जनयित्वा स ब्राह्मण्यादेव भ्रष्टो भवति।

**स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः।**
**नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम्॥ (3/52)**

**पदच्छेदः** - मोहात् + उपजीवन्ति - मोहादुपजीवन्ति।

यान्ति + अधोगतिम् - यान्त्यधोगतिम्।

**अन्वयः** - स्त्रीधनानि नारीयानानि वस्त्रं वा ये बान्धवाः मोहात् उपजीवन्ति ते पापाः अधोगतिं यान्ति।

**अर्थः** - स्त्रीधनानि - स्त्रियै दत्तं धनं, यानानि - वाहनानि, बान्धवाः - बन्धुजनाः, मोहात् - अविवेकेन, उपजीवन्ति - स्वीकुर्वन्ति (गृह्णन्ति) ते पापाः - ते पापिनः, अधोगतिं - दुर्गतिं, यान्ति - प्राप्नुवन्ति।

**सारः** - स्त्रीधनानि, तेषां वाहनानि वस्त्राणि च अविवेकेन ये बन्धुजनाः स्वीकुर्वन्ति ते पापिनः अधोगतिं यान्ति।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥ (3/56)**

**पदच्छेदः** - नार्यः + तु - नार्यस्तु।

यत्र + एताः + तु - यत्रैतास्तु।

सर्वाः + तत्र + अफलाः - सर्वास्तत्राफलाः।

**अन्वयः** - नार्यः यत्र तु पूज्यन्ते तत्र देवताः रमन्ते। एताः यत्र न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)।

**अर्थः** - नार्यः - स्त्रियः, यत्र तु - यस्मिन् देशे तु, पूज्यन्ते - स्तूयन्ते, तत्र देवताः रमन्ते - तत्र देवताः मोदन्ते। एताः - देवताः, यत्र न पूज्यन्ते - यस्मिन् देशे न स्तूयन्ते, तत्र, सर्वाः क्रियाः - सर्वे यज्ञादिकर्मकलापाः, अफलाः भवन्ति - निरर्थकाः भवन्ति।

**सारः** - यस्मिन् देशे स्त्रियः पूज्यन्ते, तत्र देवताः मोदन्ते। यत्र तु देवताः न स्तूयन्ते तत्र सर्वाः क्रियाः निरर्थकाः भवन्ति।

**शोचन्ति जामिन्यो यत्र विनश्यत्याशु तत्कुलम्।**
**न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा॥ (3/57)**

**पदच्छेदः** - विनश्यति + आशु - विनश्यत्याशु

यत्र + एताः - यत्रैताः

तत् + हि - तद्धि।

**अन्वयः** - यत्र जामिन्यः शोचन्ति तत्कुलं आशु विनश्यन्ति। यत्र एताः तु न शोचन्ति तत् सर्वदा वर्धते हि।

**अर्थः** - यत्र - यस्मिन् कुले, जामिन्यः - पुत्राणां भार्याः, शोचन्ति - दुःखमनुभवन्ति, तत् कुलं, आशु विनश्यति - झटिति विनाशं गच्छति। यत्र - यस्मिन् कुले, एताः - एताः स्त्रियः, न शोचन्ति, तत् - तत्कुलं, सर्वदा वर्धते - सर्वदा वृद्धिं प्राप्नोति।

**सारः -** यस्मिन् कुले जामिन्यः सदा दुःखमनुभवन्ति तत्कुलं शीघ्रमेव विनश्यति। यस्मिन् कुले तु जामिन्यः न शोचन्ति तत्कुलं सदा वृद्धिं प्राप्नोति।

**सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।**
**यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥** (3/60)

**पदच्छेदः** - तथा + एव - तथैव

यस्मिन् + एव - यस्मिन्नेव।

**अन्वयः** - यस्मिन् कुले भार्यया भर्ता सन्तुष्टः , तथैव भर्त्रा भार्या च सन्तुष्टा तत्र वै नित्यं कल्याणं ध्रुवम् एव।

**अर्थः** - तत्र वै - तत्रैव, नित्यं - सर्वदा, कल्याणं ध्रुवमेव - मङ्गलं निश्चितं भवति।

**सारः -** परस्परानुरागेण यस्मिन् गृहे भार्यया भर्ता सन्तुष्टः तथा भर्त्रा भार्या च सन्तुष्टा तस्मिन् गृहे सर्वदा कल्याणं निश्चितं भवति।

## पुनरावृत्तिः (Recap)

- स्मृतिग्रन्थेषु मनुस्मृतिः प्राचीनतमा भवति।
- महर्षिमनुद्वारा रचितः एषः ग्रन्थः मानवधर्मं विवृणोति।
- माता उपाध्यायान् आचार्यान् पितॄन् च गौरवेण अतिरिच्यते।
- विविक्तासने स्त्रीभिः सह स्थितिः न योग्या।
- मातापितरौ सन्ततीनां पोषणाय बहु क्लेशान् अनुभवतः।
- स्त्रीधनं सर्वदा उपेक्षणीयम्।
- नारीपूजा कार्या।
- भार्याभर्त्रोः परस्परस्नेहः आह्लाददायकः एव।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. मनुस्मृतिग्रन्थस्य रचनाकारः आचार्यः कः?
2. उपाध्यायात् श्रेयान् कः?
3. आचार्यान् अपेक्ष्य कः श्रेयान्?
4. दश उपाध्यायात् महत्तरः कः?
5. नृणां संभवे कौ क्लेशं सहेते?
6. शूद्रां शयनमारोप्य कः अधोगतिं याति?
7. के अधोगतिं यान्ति?
8. यस्मिन् कुले जामिन्यः न शोचन्ति तत्कुलं किं प्राप्नोति?
9. यस्मिन् देशे स्त्रियः पूज्यन्ते, तत्र काः मोदन्ते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. विद्वान् काभिः सह विजनदेशे न वसेत् ?
2. अविवेकेन बन्धुजनाः किं स्वीकुर्वन्ति?
3. सर्वाः क्रियाः निरर्थकाः भवन्ति । कदा ?

## एकैकया खण्डिकया उत्तराणि लिखत
(Answer the following questions in a paragraph)

1. मनुमतेन धर्मस्य का परिभाषा ?
2. स्त्रीप्राधान्यं मनुस्मृतौ?
3. प्रबलानि इन्द्रियाणि पण्डितमपि आकर्षति - कथं ? विशदयत

## निर्दिष्टाभ्यासः (Assignments)

1. धर्मशास्त्रस्य महत्त्वमधिकृत्य प्रतिपादयत।
2. स्मृतिसाहित्यस्य उद्भवं विकासं च प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मनुः ।
2. आचार्यः ।
3. पिता ।
4. आचार्यः
5. मातापितरौ
6. ब्राह्मणः
7. पापिनः
8. वृद्धिं
9. देवताः

## सूचनाग्रन्थाः (References)


1. मनुस्मृतिः, महर्षिः मनुः, कुलूकभट्टः, मोतिलाल् बनारसी दासः, दिल्ली १६८३
2. धर्मशास्त्रसेतिहासः, डा. जयकृष्णमिश्रः, चौखंबा संस्कृतसीरीस्, वाराणसी, २०१०
3. History of Dharmasastra - Dr.P.V..Kane, Bhandarkar Oriental Research Institute, Pune India, 2006.
4. मनुस्मृतिः, मेधातिथिभाष्यसंहिता, एसियाटिक्, सोसाइटि अफ् वेङ्गल्, कल्कत्ता, १६३६
5. Manusmriti with Malayalam Commentary of Swami SiddhinathAnanda, Ramakrishna Math, Puranattukara, Trichur.

# Unit - 2
## मनुस्मृतेः अधोनिर्दिष्टाः ७ श्लोकाः

### उद्देश्यानि (Learning Outcomes)

- शास्त्रान्तरेषु धर्मशास्त्रस्य महत्त्वमपि ज्ञातुं प्रभवन्ति।
- मनुमतानुसारं धर्मस्य परिभाषा लभ्यते।
- वेदाभावे कथं धर्मशास्त्रस्य प्रामाण्यं तदपि ज्ञातुं शक्नुवन्ति।
- धर्मशास्त्रपदं व्युत्पादयितुं शक्नुवन्ति।
- धर्मशास्त्रापरपर्यायः स्मृतिशब्दः यौगिकः, योगरूढो वा इति ज्ञातुं प्रभवन्ति।

### प्राग्व्यपेक्षाः (Prerequisites)

तत्र स्मृतयोऽनेकाः सन्ति। यासामपि धर्ममूलत्वं मनुना मनुस्मृतौ प्रतिपादितम्। यथा - वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। इति। स्मृतिषु मनुस्मृतेरेव श्रुत्युपग्रहेण प्राधान्यमस्ति। तथा वै श्रुतिः " यद्वै किञ्च मनुरवदत् तद्भेषजम् इति। सैवेदानीं सर्वस्मृतिप्रधानभूता मनुस्मृतिः।
मनुस्मृतेः नामान्तरमासीत् मानवधर्मशास्त्रम्। यतो मनुनोक्तमस्ति "श्रुतिस्तु वेदविज्ञयो धर्मशास्त्रं तु वै स्मृतिः। इति। यदेव शास्त्रं प्राचीनभारतवर्षे हिन्दुसमाजस्य प्राचीनतमं संविधानमासीत्, यस्य रचनाकाल इदानीमपि अनुमीयते। किञ्च आधुनिकभारतस्य संविधाने मानवधर्मशास्त्रस्य उत मनुस्मृतेः मौलिकनीतिः यथेष्टभावेन प्रतिफलिता दृश्यते।

द्वादशेष्वध्यायेषु २६९४ श्लोकाः सन्ति। प्रथमाध्यायस्थसृष्टिक्रमादारभ्य द्वादशाध्यायस्थमांजीवनदर्शनं यावद् ये विषयाः प्रतिपादिताः सन्ति, ते सर्वेऽपि विज्ञानमूलका एव। यतो मनुस्मृतिः मनुविज्ञानमित्येवोक्तमस्ति। मनुविज्ञाने कर्मण उपरि यथा प्राधान्यं दत्तमस्ति तथैव अध्यात्मविज्ञानस्योपरि अपि महत्त्वमस्तीति मनुस्मृतेरध्ययनाध्यापनद्वारा ज्ञायते।

विज्ञानप्रभावेण तथा जीवने प्रतिसिपर्धा बुद्धिरुपागता, यथा प्रतिस्पर्धायामेव जीवनं राष्ट्रं समाजे वा क्षयमुपैति। अस्य विकासे सदाचारस्य सहानुभूतेः शीलस्य विनयस्य च स्थानमेव नोपलभ्यते। धीरतवात् वीरत्वम्, आस्तिक्यम्, स्नेह- श्रद्धा - भक्तयः, सदाचारश्च तुषारपातहतकमलानीव लायन्ते विनश्यन्ते च। अतो विज्ञानस्यास्य सदुपयोगो यथा भवेत्, तदर्थं सर्वैः प्रयासः करणीयः।

## मुख्यपदानि (Keywords)

सूना, चुल्ली, पेषणी, कण्डनी, पञ्चसूनाः, उदकुम्भः, क्लृप्ता, तर्पणम्, उच्छ्वसन्, बलिर्भौतः, अवधीत्, निधने, अनुयाति ।

## Discussion

**पञ्च सूना गृहस्थस्य चुल्लीपेषण्युपस्कराः ।**
**कण्डनी चोदकुम्भश्च बध्यते यस्तु वाहयन् ॥ (3/68)**

**पदच्छेदः** - पेषणी + उपस्कराः - पेषण्युपस्कराः ।

च + उदकुम्भः + च - चोदकुम्भश्च ।

यः + तु - यस्तु ।

**अन्वयः** - चुल्ली, पेषणी, उपस्कराः, कण्डनी, उदकुम्भश्च गृहस्थस्य पञ्चसूनाः (भवन्ति) यः वाहयन् (पुरुषः) बध्यते ।

**अर्थः** - चुल्ली - fireplace, पेषणी - grinder , उपस्करः - मार्जनी (संमार्जनी) , उदकुम्भः - घटः, गृहस्थस्य - गृहस्थाश्रमिणः, पञ्च सूनाः - पञ्च पापाः, एतासां - व्यापारेण पुरुषः बध्यते ।

**सारः** - चुल्ली पेषणी मार्जनी कण्डनी उदकुम्भश्चेति गृहस्थस्य पञ्च पापाः सन्ति । एतासां व्यापारेण पुरुषः पापैः बध्यते ।

**तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।**
**पञ्चक्लृप्ताः महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥ (3/69)**

**पदच्छेदः** - प्रति + अहं - प्रत्यहं ।

**अन्वयः** - तासां सर्वासां क्रमेण निष्कृत्यर्थं गृहमेधिनां प्रत्यहं पञ्च महायज्ञाः महर्षिभिः क्लृप्ताः ।

**अर्थः** - तासां सर्वासां - पूर्वोक्तानां पापानां, निष्कृत्यर्थं - शमनार्थं, प्रत्यहं - प्रतिदिनं, गृहमेधिनां - गृहस्थानां, पञ्च महायज्ञाः - पञ्च संख्याकाः महायज्ञाः, महर्षिभिः क्लृप्ताः - विहिताः ।

**सारः** - पूर्वोक्तानां पञ्च पापानां शमनार्थं गृहस्थानां प्रतिदिनं पञ्च महायज्ञाः महर्षिभिः निर्दिष्टाः ।

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।**
**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ (3/70)**

**पदच्छेदः** - पितृयज्ञः + तु - पितृयज्ञस्तु।

बलिः + भौतः - बलिर्भौतः।

नृयज्ञः + अतिथिपूजनम् - नृयज्ञोऽतिथिपूजनम्।

**अन्वयः** - ब्रह्मयज्ञः अध्यापनं, पितृयज्ञः तु तर्पणं, दैवयज्ञः होमः, भौतोयज्ञः बलिः,नृयज्ञः अतिथिपूजनं चेति पञ्चयज्ञाः।

**अर्थः** - ब्रह्मयज्ञः - पञ्चयज्ञेषु आद्यः यज्ञः, अध्यापनं भवति। पितृयज्ञः - द्वितीयो यज्ञः, तर्पणं - अन्नादिना उदकेन वा तर्पणं, दैवयज्ञः - तृतीयो यज्ञः, होमः - द्रव्याणां देवतोद्देश्येन अग्नौ निक्षेपः, भौतो यज्ञः - भूतयज्ञः, बलिः - भूतबलिः (भूतान्युद्दिश्य बलिः) नृयज्ञः - मनुष्ययज्ञः, अतिथिपूजनं - अतिथिपूजा।

**सारः** - पञ्च महायज्ञेषु आद्यः ब्रह्मयज्ञः अध्यापनं भवति। अन्नादिना उदकेन वा तर्पणं पितृयज्ञः भवति। द्रव्याणां देवतोद्देश्येन अग्नौ निक्षेपरूपः होमः तृतीयो यज्ञः। भूतान्युद्दिश्य बलिः भौतो यज्ञः भवति। अन्तिमः नृयज्ञः अतिथिपूजनं भवति। एवं पञ्चमहायज्ञाः महर्षिः निर्दिष्टाः।

**पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।**
**स गृहेऽपि वसन् नित्यं सूनादोषैर्न लिप्यते॥ (3/71)**

**पदच्छेदः** - पञ्च + एतान् - पञ्चैतान्।

गृहे + अपि - गृहेऽ।

सूनादोषैः + न - सूनादोषैर्न।

**अन्वयः** - यः एतान् पञ्च महायज्ञान् शक्तितः न हापयति सः नित्यं गृहे वसन्नपि सूनादोषैः न लिप्यते।

**अर्थः** - यः - अनुष्ठाता, एतान् - अत्रोक्तान्, पञ्च महायज्ञान् - ब्रह्मयज्ञादीन् पञ्च यज्ञान् न हापयति - न त्यजति (अनुतिष्ठति) सः नित्यं गृहे वसन्नपि, सूनादोषैः - पूर्वोक्तैः पापैः, न लिप्यते - न सम्बध्यते।

**सारः** - अत्रोक्तान् ब्रह्मयज्ञादीन् पञ्च महायज्ञान् स्वशक्त्या अनुतिष्ठति सः नित्यं स्वगृहे वसन्नपि पूर्वोक्तैः पापैः न लिप्यते।

**देवातिथिभृत्यानां पितृणामात्मनश्च यः।**
**न निर्वपति पञ्चानामुच्छ्वसन् न स जीवति॥ (3/72)**

**पदच्छेदः** - पितृणाम् + आत्मनः + च - पितृणामात्मनश्च

पञ्चानाम् + उच्छ्वसन् - पञ्चानामुच्छ्वसन्।

**अन्वयः** - यः देवातिथिभृत्यानां पितृणाम् आत्मनः चेति पञ्चानां न निर्वपति सः उच्छ्वसन् अपि न जीवति।

**अर्थः** - यः - यः पुरुषः, देवातिथिभृत्यानां - देवानां अतिथीनां भृत्यानां, पितृणां - मातुः पितुः च, आत्मनः - स्वस्य चेति पञ्चानां, न निर्वपति - अन्नं न ददाति, सः उच्छ्वसन् अपि - उच्छ्वासनिश्वासौ कुर्वन्नपि, न जीवति - वस्तुतः न जीवति।

**सारः -** यः पुरुषः देवानां अतिथीनां भृत्यानां, पितृणां स्वस्य च यथावत् अन्नं न ददाति चेत् सः उच्छ्वासनिश्वासयुक्तोऽपि वस्तुतः न जीवति।

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**
**तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् (8/15)**

**पदच्छेदः** -

तस्मात् + धर्मः - तस्माद्धर्मो।

हतः + अवधीत् - हतोऽवधीत् ।

**अन्वयः** - हतः धर्मः एव हन्ति, रक्षितः धर्मः रक्षति। हतः धर्मः नः मा अवधीत् तस्मात् धर्मो न हन्तव्यः।

**अर्थः** - हतः - विनष्टः, धर्मः, हन्ति - नाशयति, रक्षितः - संरक्षितः, रक्षति - अस्मान् रक्षति। न हन्तव्यः - न नाशयेत्। नः मा अवधीत् - अस्मान् न नाशयेत्।

**सारः -** विनष्टः (नाशितः) धर्मः सर्वान् अपि नाशयेत्। धर्मः संरक्षितश्चेत् सः सर्वान् रक्षयेत्। विनष्टः धर्मान् अस्मान् न नाशयेत् इति चिन्तया धर्मनाशं न कुर्यात् इत्याशयः।

**एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।**
**शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥ (8/17)**

**पदच्छेदः** -

सुहृत् + धर्मः -सुहृद्धर्मः।

निधने + अपि + अनुयाति - निधनेऽप्यनुयाति।

सर्वं + अन्यत् + हि - सर्वमन्यद्धि ।

**अन्वयः** -एकः धर्मः एव सुहृत् यः निधने अपि अनुयाति। हि अन्यत् सर्वं शरीरेण समं नाशं गच्छति ।

**अर्थः** - सुहृत् - मित्रं, निधने अपि - मरणे अपि, अनुयाति - अनुगच्छति।

**सारः** - यः मरणे अपि सर्वान् अनुगच्छति सः धर्मः एक एव सर्वेषां सुहृत् भवति । धर्मभिन्नं सर्वं मरणावस्थायां शरीरेण सह विलयं गच्छति इति हेतोः धर्मभिन्नः कश्चित् सुहृत् नास्ति लोके ।

## पुनरावृत्तिः (Recap)

- गृहस्थस्य पञ्च पापाः।
- पञ्चपापानां शमनाय पञ्च महायज्ञाः कार्याः।
- महायज्ञः, पितृयज्ञः, दैवयज्ञः, भौतोयज्ञः, अतिथिपूजा च कार्याः।
- यज्ञं करिष्यति चेत् पापः न जायते।
- यः यज्ञादिकं न करोति, यः श्वसन्नपि न जीवति।
- धर्मो रक्षति रक्षितः।
- एक एव सुहृत्, सः धर्मः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. कति पापाः सन्ति?
2. पापानाशाय किं करणीयम्?
3. धर्मभिन्नः कः नास्ति लोके ?
4. किं अतिथिपूजनम् ?
5. किं नाम अध्यापनम्?
6. पिं नाम पितृयज्ञः?
7. हतः धर्मः एव हन्ति, रक्षितः धर्मः .... । (रिक्तं पूरयत)
8. अन्नादिना उदकेन वा तर्पणं किं भवति?
9. कति महायज्ञाः महर्षिः निर्दिष्टाः ?
10. धर्मभिन्नं सर्वं कदा शरीरेण सह विलयं गच्छति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. स्मृत्यनुसारं प्रधानधर्मः कः ?
2. धर्मो न हन्तव्यः- कस्मात् ?

3. गृहस्थस्य पञ्च सूनाः के ?
4. पञ्च महायज्ञाः के ?
5. सः उच्छ्वासनिश्वासयुक्तोऽपि वस्तुतः न जीवति । सः कः ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. स्मृतिकारेषु मनोः प्राधम्यं दर्शयत ।
2. धर्मशास्त्रस्य स्मृतिरिति संज्ञा कथम् ?
3. धर्मभिन्नः कश्चित् सुहृत् नास्ति लोके - कस्मात् ?

## निर्दिष्टाभ्यासः (Assignments)

1. मनोः प्राचीनतां प्रमाणीकुरुत ।
2. पञ्च महायज्ञानधिकृत्य उपन्यस्यत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. पञ्च ।
2. पञ्चमहायज्ञाः कर्तव्याः ।
3. कश्चित् सुहृत् ।
4. नृयज्ञः ।
5. महायज्ञः ।
6. तर्पणम् ।
7. रक्षति ।
8. पितृयज्ञः ।
9. पञ्च ।
10. मरणावस्थायाम् ।

## सूचनाग्रन्थाः (References)


1. मनुस्मृतिः, महर्षि मनुः, कुलूकभट्टः, मोतिलाल् बनारसी दासः, दिल्ली १९८३
2. धर्मशास्त्रसेतिहासः, डा. जयकृष्णमिश्रः, चौखंबा संस्कृतसीरीस्, वाराणसी, २०१०
3. History of Dharmasastra - Dr.P.V..Kane, Bhandarkar Oriental Research Institute, Pune India, 2006.
4. मनुस्मृतिः, मेधातिथिभाष्यसंहिता, एसियाटिक्, सोसाइटि अफ् वेङ्गल्, कल्कत्ता, १९३९
5. Manusmriti with Malayalam Commentary of Swami Siddhinathananda, Ramakrishna Math, Puranattukara, Trichur.

# Unit - 3
## याज्ञवल्क्यस्मृतेः अधोनिर्दिष्टाः १० श्लोकाः

### उद्देश्यानि (Learning Outcomes)

- स्मृतिशब्दार्थं ज्ञातुं शक्नुवन्ति ।
- शास्त्रान्तरेषु धर्मशास्त्रस्य महत्त्वमपि ज्ञातुं प्रभवन्ति ।
- स्मृतिकारेषु याज्ञवल्क्यस्य कथं प्राधान्यमिति ज्ञातुं शक्नुवन्ति ।
- याज्ञवल्क्यस्मृतेः स्वीकृतपाठभागपठनेन सविशेषज्ञानं लभते ।

### प्राग्व्यपेक्षाः (Prerequisites)

याज्ञवल्क्यमहर्षिणा लिखिता स्मृतिः याज्ञवल्क्यस्मृतिनाम्ना चिरं प्रख्याताऽस्ति । स्मृतिसाहित्ये यद्यपि विंशत्यधिकाः स्मृतयः समुपलब्धाः तथापि विषयविवेचनदृष्ट्या स्मृतीनामावल्यां मनुस्मृतेः विकसिता तथा वैज्ञानिककेन्द्रिता च विद्यते याज्ञवल्क्यस्मृतिः । ब्रिटिष्प्रशासनकाले हैन्दवनियमानां प्रामाणिकरूपेण आधारीकृतः ग्रन्थोऽपि अयमेवासीत् ।

मानवसामाजे व्यावहारिकदृष्ट्या तत्प्रणीतायाः स्मृतेः सुमहद् गौरवं वरीवर्ति । याज्ञवल्क्यस्मृतिः सनकादीनामृषीणां सोमश्रवादिमुनीनाञ्च धर्मजिज्ञासायां प्रश्नोत्तरच्छलरूपा स्मृतिरिति कथ्यते । मनुस्मृतिवत् संहितायाम् अस्यामपि यथाक्रमम् आचार - व्यवहार - प्रायश्चित्तभेदेन त्रयोऽध्याया वर्तन्ते । तत्र प्रथमाध्याये (आचाराध्याये) उपोद्घातप्रकरणं, ब्रह्मचारिप्रकरणं, विवाहप्रकरणं, वर्णजातिविवेकप्रकरणं, गृहस्थप्रकरणम्, स्नातवहप्रकरणम्, भक्ष्याभक्ष्यप्रकरणम्, द्रव्यशुद्धिप्रकरणम्, दानप्रकरणं, श्राद्धप्रकरणम्, गणपतिकल्पप्रकरणम्, ग्रहशान्तिःप्रकरणम्, राजधर्म-प्रकरणम्, चेति त्रयोदशप्रकरणानि सन्ति । ततो व्यवहाराध्याये साधारणव्यवहारणानि सन्ति । तत्र साधाराव्यवहारमातृका,ऋणादानो-पनिधि-साक्षी-लेख्य-दिव्य-दायविभाग-सीमाविवाद-स्वामिपालविवाद-अस्वामिविक्रय-दत्ताप्रदानिक-क्रीतानुशया-अभ्युपेत्याशुश्रूषा-संविदव्यतिक्रम-वेतनादानद्यूत समाह्वय-वाक्पारुष्य-दण्डपारुष्य-साहसविक्रीयासम्प्रदानसम्भूय समुत्थान-स्तैय-स्त्रीसङ्ग्रहण-प्रकरणञ्चेति पंचविंशतिप्रकरणानि सन्ति । ततश्च प्रायश्चित्ताध्यायेऽशौचप्रकरणम्, आपद्धर्मप्रकरणम्, वानप्रस्थप्रकरणम्, यति-धर्मप्रकरणम्, प्रायश्चित्त-प्रकरणम्, प्रकीर्ण-प्रायश्चित्तानि चेति षट् प्रकरणानि समुपस्थापितानि । मनुस्मृतेरपेक्षया याज्ञवल्क्यस्मृतिरधिकव्यवस्थिता शृङ्खलिता च ।

## मुख्यपदानि (Keywords)

अन्नं, जलं, स्वाध्यायं,बालान्, संभोज्य, शेषभुग्, ब्रह्महा, गुरुतल्पगः, सुहृद्वधः,जैहम्यं, सुवर्णः, स्नुषा।

## Discussion

**अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम्।**

**स्वाध्यायं सततं कुर्यान्न पचेदन्नमात्मनः॥(1/104)**

**पदच्छेदः** - देयम् + अपि + अन्वहं - देयमप्यन्वहम्।

कुर्यात् + न - कुर्यान्न।

पचेत् + अन्नं + आत्मनः - पचेदन्नमात्मनः।

**अन्वयः** - पितृमनुष्येभ्यः प्रत्यहं अन्नं जलमपि देयम्। सततं स्वाध्यायं कुर्यात्। आत्मनः अन्नं न पचेत्।

**अर्थः** - पितृमनुष्येभ्यः - पितृभ्यः मनुष्येभ्यश्च, प्रत्यहं - प्रतिदिनं, अन्नं जलमपि देयं - अन्नं जलं च दातव्यम्। सततं - सर्वदा, स्वाध्यायं - वेदं, कुर्यात् - पठेत् (अविस्मरणार्थं) आत्मने - आत्मानम् उद्दिश्य, अन्नं न पचेत्।

**सारः** - पितृभ्यः मनुष्येभ्यः च प्रतिदिनं यथाशक्ति अन्नं जलं च देयम्। सर्वदा अविस्मरणार्थं वेदं पठेत्। अन्नपचनं देवतोद्देश्येन कुर्यात्, न आत्मार्थम्।

**बालास्वंवासिनीवृद्धगर्भिण्यातुरकन्यकाः।**

**संभोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम्॥ (1/105)**

**पदच्छेदः** - संभोज्य + अतिथिभृत्यान् + च - संभोज्यातिथिभृत्यांश्च।

**अन्वयः** - बालान् स्ववासिनीं वृद्धान् गर्भिणीं आतुरान् कन्यकाः अतिथीन् भृत्यान् च संभोज्य शेषभोजनं दम्पत्योः कर्तव्यम्।

**अर्थः** - स्ववासिनीं - पितृगृहे स्थिता परिणीता स्ववासिनी, तां, संभोज्य - भोजयित्वा, दम्पत्योः - जाया च पतिश्चेति दम्पती, तयोः।

**सारः** - बालान् स्ववासिनीं वृद्धान् गर्भिणीं आतुरान् कन्यकाः अतिथीन् भृत्यान् च भोजयित्वा एव दम्पत्योः भोजनं कर्तव्यम्।

**प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्।**

**कामतो व्यवहार्यस्तु वचनादिह जायते ॥(3/226)**

**पदच्छेदः** - प्रायश्चित्तैः + अपेत्य + एनः - प्रायश्चित्तैरपैत्येनः ।

यत् + अज्ञानकृतं - यदज्ञानकृतम् ।

व्यवहार्यः + तु - व्यवहार्यस्तु ।

वचनात् + इह - वचनादिह ।

**अन्वयः** - अज्ञानकृतं यत् एनः भवेत् तत् प्रायश्चित्तैः अपैति । इह कामयतः व्यवहार्यो जायते ।

**अर्थः** - अज्ञानकृतं - अज्ञानजन्यं, यत् एनः - यत् पापं भवेत्, तत् प्रायश्चित्तैः - पापपरिहारार्थं क्रियमाणैरुपायैः, अपैति - विनश्यति । इह - अस्मिन् लोके, कामतः - कामेन व्यवहार्यो जायते ।

**सारः -** अज्ञानजन्यं यत् पापं भवेत् तत् प्रायश्चित्तैः विनश्यति । अस्मिन् लोके कामेन व्यवहार्यो जायते ।

**ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः ।**

**एवं महापातकिनो यश्च तैस्सह संविशेत् ॥(3/227)**

**पदच्छेदः** - स्तेनः + तथैव - स्तेनस्तथैव ।

यः + च - यश्च ।

तैः + सह - तैस्सह ।

**अन्वयः** - ब्रह्महा मद्यपः स्तेनः तथैव गुरुतल्पगः एवं यः तैः सह संविशेत् एते महापातकिनः (भवन्ति) ।

**अर्थः** - ब्रह्महा - ब्रह्मणं हन्तीति ब्रह्महा, मद्यपः - मद्यं (सुरादिकं) पिबतीति मद्यपः, स्तेनः - परद्रव्यापहर्ता, गुरुतल्पगः - गुरुभार्यागामी, यः तैः - मद्यपादिभिः, सह - साकं, संविशेत् - संवसति, एते - पूर्वोक्ताः सर्वे, महापातकिनः - पातयन्तीति पातकानि ब्रह्महत्यादीनि महापातकानि कुर्वन्ति ये ते महापातकिनः भवन्ति ।

**सारः -** ब्रह्महा, मद्यपः, परद्रव्यापहर्ता, गुरुभार्यागामी, मद्यपादीनां सहवासिनः इत्येवं सर्वे महापातकिनः भवन्ति ।

**गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः ।**

**ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ॥(3/228)**

**पदच्छेदः** - गुरूणाम् + अध्यधिकक्षेपः - गुरूणामध्यधिक्षेपः ।

ज्ञेयं + अधीतस्य - ज्ञेयमधीतस्य ।

**अन्वयः** - गुरूणां अध्यधिक्षेपः वेदनिन्दा सुहृद्वधः अधीतस्य नाशनं च ब्रह्महत्यासमं ज्ञेयम् ।

**अर्थः** - गुरूणां अध्यधिक्षेपः - गुरूणाम् आधिक्येन अधिक्षेपः, (अनृताभिशंसनं) वेदनिन्दा - वेदनिराकरणं, सुहृद्वधः - मित्रवधः, अधीतस्य नाशनं - अधीतस्य वेदस्य विस्मरणं, ब्रह्महत्यासमं ज्ञेयं - एतानि ब्रह्महत्यासमानि ज्ञेयानि ।

**सारः -** गुरूणामधिक्षेपः, वेदनिन्दा, मित्रवधः, अधीतस्य वेदस्य विस्मृतिः, इत्येते ब्रह्महत्यासदृशाः ज्ञेयाः ।

**निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् ।**

**रजस्वलामुखास्वादः सुरापानसमानि तु ॥(3/229)**

**पदच्छेदः** - जैह्मयं + उत्कर्षे - जैह्म्यमुत्कर्षे

वचः + अनृतं - वचोऽनृतम् ।

**अन्वयः** - निषिद्धभक्षणं जैह्मयं उत्कर्षे अनृतं वचः रजस्वलामुखास्वादः इत्येतानि सुरापानसमानि भवन्ति ।

**अर्थः** - निषिद्धभक्षणं - निषिद्धानां लशुनादीनां भक्षणं, जैह्मयं - कौटिल्यं, उत्कर्षे अनृतं वचः - अचतुर्वेद एव चतुर्वेदोऽहमिति अनृतभाषणं, रजस्वलामुखास्वादः - रजस्वलायाः मुखदर्शनं,एतानि सुरापानसमानि निषिद्धानि भवन्ति ।

**सारः -** लशुनादीनां निषिद्धानां भक्षणं कुटिलता अचतुर्वेद एव चतुर्वेदोऽहमिति अनृतभाषणं रजस्वलामुखदर्शनं च सुरापानसमानि निषिद्धानि भवन्ति ।

**अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ।**

**निक्षेपस्य च सर्वं हि सुवर्णस्तेयसम्मितम् ॥(3/230)**

**अन्वयः** - अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा निक्षेपस्य (हरणं) चेति सर्वं सुवर्णस्तेयसम्मितम् ।

**अर्थः** - अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं - अश्वहरणं रत्नहरणं मनुष्यहरणं स्त्रीहरणं भूहरणं धेनुहरणं, तथा निक्षेपस्य - अश्वादीनामिव निक्षेपस्य, अपहरणमपि, सर्वं - सर्वेषां हरणं, सुवर्णस्तेयसम्मितं - सुवर्णहरणतुल्यं भवति ।

**सारः -** अश्वरत्नमनुष्यादीनाम् अपहरणं तथा भूमेः अपहरणं, धेनोः अपहरणं, निक्षेपस्यापहरणं, चेत्येतत् सर्वेषां अपहरणं सुवर्णस्य अपहरणसदृशं एवेति यावत् ।

**सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च।**

**सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम्।॥ (3/ 231)**

**पदच्छेदः** - स्वयोनिषु + अन्त्यजासु - स्वयोनिष्वन्त्यजासु।

**अन्वयः** - सखिभार्याकुमारीषु स्वयोनिषु अन्त्यजासु सगोत्रासु सुतस्त्रीषु च गुरुतल्पसमं स्मृतम् ।

**अर्थः** - सखि - सखा (मित्रं), भार्या - तस्य भार्या, कुमारी - उत्तमजातीया कन्यका, तासु सखिभार्याकुमारीषु, स्वयोनिषु - स्वयोनिः भगिनी, तासु, अन्त्यजा - चाण्डाली, तासु अन्त्यजासु, सगोत्रासु- समानगोत्रासु, सुतस्त्रीषु - सुतस्त्री तासु, एतासां गमनं गुरुतल्पसमं स्मृतम्।

**सारः -** स्वमित्रेषु, मित्रभार्यासु, उत्तमजातीयासु कन्यकासु भगिनीषु चाण्डालीषु समानगोत्रासु सुतस्त्रीषु च गमनं गुरुतल्पसमं स्मृतम्।

**पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि।**

**मातुः सपत्नीं भगिनीं आचार्यतनयां तथा॥ (3/232 )**

**आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः।**

**लिङ्गं छित्वा वधस्तत्र सकामाया स्त्रिया अपि॥ (3/233)**

**पदच्छेदः** - मातुः + च - मातुश्च।

स्नुषां + अपि - स्नुषामपि।

गच्छन् + तु - गच्छंस्तु।

वधः + तत्र - वधस्तत्र।

**अन्वयः** - पितुः स्वसारं मातुः मातुलानीं स्नुषां मातुः सपत्नीं भगिनीं आचार्यतनयां तथा आचार्यपत्नीं स्वसुतां गच्छन् यः गुरुतल्पगः तस्य लिङ्गं छित्वा राज्ञा वधः कर्तव्यः स्वकामायाः स्त्रियाः अपि।

**अर्थः** - पितुः स्वसारं - पितुः सोदरीं, मातुः मातुलानीं - मातुः भ्रातृपत्नीं, स्नुषां - पुत्रवधूम्, भगिनीं - सोदरीं, आचार्यतनयां - आचार्यपुत्रीम्।

**सारः -** पितुः सोदरीं मातुः भ्रातृपत्नीं पुत्रवधूं सोदरीं आचार्यतनयां स्वसुतां च गच्छन् पुरुषः गुरुतल्पग इत्युच्यते। तस्य लिङ्गं छित्वा राज्ञा वधः कर्तव्यः इति यावत्।

## पुनरावृत्तिः (Recap)

- महर्षिणा याज्ञवल्क्येन विरचिता इयं स्मृतिः "याज्ञवल्क्यस्मृतिः"।
- पितृमनुष्येभ्यः अन्नं जलं च देयम्।
- सर्वान् भोजयित्वा एव दम्पत्योः भोजनं कार्यम्।
- अज्ञानजन्यं पापं प्रायश्चित्तेन नश्यति।
- ब्रह्महत्या महान् पापः।
- गुरूणामध्यधिक्षेपः न कार्यः।
- निषिद्धभक्षणं न स्वीकर्तव्यम्।
- अश्वरत्नादीनामपहरणं दोषाय भवति।
- सदा धार्मिकचिन्ता वर्तितव्या।
- अगम्यगमनं न कार्यम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. केन विरचिता भवति याज्ञवल्क्यस्मृतिः ?
2. किं सततं कार्यम्?
3. स्ववासिनी का ?
4. अस्मिन् लोके केन व्यवहार्यः जायते ?
5. किं नाम ब्रह्महा ?
6. केभ्यः प्रतिदिनं यथाशक्ति अन्नं जलं च देयम् ?
7. किं देवतोद्देश्येन कुर्यात् ?
8. सर्वेषां अपहरणं सुवर्णस्य ....। (रिक्तं पूरयत)
9. अज्ञानजन्यं पापं कैः विनश्यति ?
10. वेदनिन्दा कस्य समानं भवति?
11. उत्कर्षे कीदृशी वाक् न भवेत्?
12. अधीतस्य वेदस्य विस्मरणं किमिव भवति?
13. अगम्यगमने कः दण्डः देयः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. कानि सुरापानसमानानि ?
2. के महापातकिनः ?
3. के ब्रह्महत्यासदृशाः ?
4. कानि सुरापानसमानि निषिद्धानि भवन्ति ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. कियत्प्रकारं दंपत्या भोजनं कर्तव्यम् ?
2. पुरुषः गुरुतल्पग इत्युच्यते - विशदयत।
3. याज्ञवल्क्यस्मृतेः शैली कीदृशी ?

## निर्दिष्टाभ्यासः (Assignments)

1. धर्मशास्त्रे याज्ञवल्क्यस्मृतेः महत्वं प्रतिपादयत।
2. महापातकानि अधिकृत्य लघुप्रबन्धं रचयत ।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. याज्ञवल्क्येन।
2. स्वाध्यायम्।
3. पितृगृही वासिनी परिणीता स्त्री।
4. कामेन।
5. ब्रह्माणं हन्तीति।
6. पितृमनुष्येभ्यः।
7. अन्नपचनम्।
8. अपहरणसदृशम्।
9. प्रायश्चित्तैः।

10. ब्रह्महत्या इव।
11. अनृतवाक्।
12. ब्रह्महत्या इव।
13. लिङ्गं छित्वा वधः।

## सूचनाग्रन्थाः (References)


1. याज्ञवल्क्यस्मृतिः, महर्षि याज्ञवल्क्यः, चौखम्बा कृष्णदास् अकादमी, वाराणसी २०१४
2. History of Dharmasastra - Dr.P.V..Kane, Bhandarkar Oriental Research Institute, Pune India, 2006.
3. याज्ञवल्क्यस्मृतिः, मिताक्षरा व्यवहार बालम्बट्टी, वीरमित्रोदय, चौखंबा संस्कृतसीरीस्, वाराणसी, १६३०.
4. याज्ञवल्क्यस्मृतिः, वीरमित्रोदयटीका सहिता, चौखंबा संस्कृतसीरीस्, वाराणसी
5. Yajnavalkya Smruthy with Malayalam Commentary of Prof.C.V.Vasudeva Bhattathiri, (Dept.of Cultural Publications, Govt. of Kerala, Thiruvananthapuram.)

**Set-1**
**Model question paper**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ……… Reg. No : ……….............
Name : ………………...

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATION**
**B21SN03SE मूल्यशिक्षा**
**(CBCS - UG)**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः । संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या ।**

**SECTION - A**
**(प्रथमो भागः)**

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत ।** **(10x1=10)**
**(Answer any ten questions in a word or sentence)**

1. श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति ?
2. श्रीमद्भगवद्गीतायां कः कस्मै उपदेशं दत्तवान्?
3. पूजार्हौ आचार्यौ कौ ?
4. भगवान् श्रीकृष्णः कस्य शोचनीयाम् अवस्थां दृष्टवान् ?
5. येन आत्मतत्त्वेन किं व्याप्तः ?
6. तत् नाशरहितं इति विद्धि। तत् किम् ?
7. का पुरुषमलङ्करोति?
8. केन रचितः ग्रन्थः भवति नीतिशतकम् ?
9. मनुस्मृतिग्रन्थस्य रचनाकारः आचार्यः कः ?
10. कति पापाः सन्ति ?
11. केन विरचिता भवति याज्ञवल्क्यस्मृतिः ?
12. पापनाशाय किं करणीयम् ?
13. धर्मभिन्नः कः नास्ति लोके?

14. किं नाम अतिथिपूजा?

15. किं नाम अध्यापनम्?

**SECTION – B**

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**

**(Answer any five questions in one or two sentences)**

16. योगस्य लक्षणम् एकं लिखत।

17. स्थितप्रज्ञस्य लक्षणम् एकं लिखत।

18. श्रीकृष्णः अर्जुनं प्रति किं त्यक्त्वा युद्धार्थं सन्नधो भव इति वदति ?

19. श्रीकृष्णः अर्जुनस्य सर्वाणि कारणानि अयोग्यानि इति उक्तवान् । कस्मात् कारणात् ?

20. नित्यं आत्मानं नाशयितुं कोऽपि न शक्नोति । कुतः ?

21. एनमात्मानं विदित्वा अनुशोचितुं न अर्हसि - कस्मात् ?

22. स्मृत्यानुसारं प्रधानः धर्मः कः?

23. के महापातकिनः?

24. विद्याविहीनः पशुसमानो भवति। कस्मात् ?

25. एते स्वभावविशेषाः परोपकारिषु लोके दृश्यन्ते। के ?

26. धर्मो न हन्तव्यः?

27. के प्रत्यक्षदेवताः स्मृताः ?

28. के ब्रह्महत्यासदृशाः ?

29. कानि सुरापानसमानि निषिद्धानि भवन्ति ?

**SECTION - C**

**(तृतीयो भागः)**

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**

**(Answer any six questions)**

30. भगवतः श्रीकृष्णस्य स्वरूपनिर्णयं कुरुत।

31. अर्जुनः युद्धोपरामनिर्णयस्य स्पष्टनिरूपणं करोति । विशदयत

32. शोकः किमर्थं न करणीयः ?

33. जन्मवतो नाशः नाशवतो जन्म च अवश्यंभाविनौ - विशदयत ।

34. संस्कृतवाङ्मये सत्सङ्गस्य महत्वं कथम् अङ्गीकृतम् ?

35. विद्यायाः प्रशंसनमधिकृत्य लिखत।

36. मनुमतेन धर्मस्य का परिभाषा ?

37. पुरुषः गुरुतल्पग इत्युच्यते - विशदयत।

## SECTION - D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत।** **(2x10=20)**
**(Write an essay on any two of the following)**

38. अर्जुनस्य अवस्थाविशेषमधिकृत्य उपन्यस्यत।

39. आत्मनः षट्भावरहितत्वम् विशदयत ।

40. शास्त्रान्तरेषु धर्मशास्त्रस्य महत्वमधिकृत्य प्रतिपादयत।

41. स्मृतिकारेषु मनोः प्राथम्यं दर्शयत।

SGOU

**Set-2**
**Model question paper**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ……… Reg. No : ………...............
Name : ………………...

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATION**
**B21SN03SE मूल्यशिक्षा**
**(CBCS - UG)**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः । संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या ।**

**SECTION - A**
**(प्रथमो भागः)**

I. **एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत ।** **(10x1=10)**
**(Answer any ten questions in a word or sentence)**

1. श्रीमद्भगवद्गीता कः रचयामास ?
2. गीतायां कति श्लोकाः सन्ति ?
3. भगवान् श्रीकृष्णः अर्जुनं किं त्यक्तुमुपायं वदति ?
4. अर्जुनः किं ददाति ?
5. नित्यस्य शरीरिणः देहाः के उक्ताः ?
6. अयं न जायते म्रियते - अत्र अयं कः ?
7. का पुरुषं भूषयति ?
8. प्रच्छन्नगुप्तं धनं किम् ?
9. किं सततं कुर्यात्?
10. स्ववासिनि का?
11. अस्मिन् लोके व्यवहार्यः जायते ?
12. किं नाम ब्रह्महा?
13. धर्मभिन्नः कः नास्ति लोके ?
14. किं अतिथिपूजनम् ?

15. यस्मिन् देशे स्त्रियः पूज्यन्ते, तत्र काः मोदन्ते ?

## SECTION - B
## (द्वितीयो भागः)

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**

**(Answer any five questions in one or two sentences)**

16. प्रकृतिः कतिविधा भवति ? के च ते ?
17. सन्न्यासिस्वरूपं किम्?
18. युद्धे किं अवश्यंभावि ?
19. किमुक्त्वा अर्जुनः तूष्णीं अभवत् ?
20. विद्याविहीनः पशुसमानो भवति । कस्मात् ?
21. एते स्वभावविशेषाः परोपकारिषु लोके दृश्यन्ते। के ?
22. कौ स्वाभाविकौ ?
23. आत्मा दुर्बोधः । कथम् ?
24. पुरुषस्य नित्यं भूषणं किं भवति ?
25. ते भुवि मर्त्यलोके भारभूताः मनुष्यरूपेण मृगाः चरन्ति। के ?
26. अविवेकेन बन्धुजनाः किं स्वीकुर्वन्ति?
27. सर्वाः क्रियाः निरर्थकाः भवन्ति। कदा ?
28. कानि सुरापानसमानानि ?
29. के महापातकिनः ?

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**

**(Answer any six questions)**

30. गीतायां योगस्वरूपं वर्णयत।
31. स्थितप्रज्ञस्य लक्षणं विस्तरेण विचारयत।
32. कथं कापुरुषत्वं प्रदर्शितम् ?
33. श्रीकृष्णेन उक्तानि वचनानि अर्जुनस्य उपरि अत्यन्तं प्रभावमकुर्वन् । तानि वचनानि कानि ?
34. आत्मा हननक्रियायाः कर्ता वा कर्म न भवति - कस्मात् ?
35. आत्मा कीदृशः ?

36. महात्मनां स्वाभाविकः स्वभावाः के ?

37. परोपकारिणां स्वभावाः के ?

## SECTION - D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत।** **(2x10=20)**

**(Write an essay on any two of the following)**

38. गीताप्रस्थानविषये प्रबन्धं लिखत।

39. नीतिशतकमधिकृत्य प्रबन्धं आरचयत।

40. महापातकानि अधिकृत्य लघुप्रबन्धं रचयत ।

41. स्मृतिसाहित्यस्य उद्भवं विकासं च प्रतिपादयत।

SGOU

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

मूल्यशिक्षा

COURSE CODE: B21SN02SE

SGOU

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-982754-6-2